॥ ओ३म् ॥
शीलं शौर्यमनालस्यं पाण्डित्यं मित्रसंग्रहः।
अचोरहरणीयानि पञ्चौतान्यक्षयो निधिः॥

न सा सभा यत्र न सन्ति वृद्धा वृद्धा न ते ये न वदन्ति धर्मम्।
धर्मः स नो यत्र न सत्यमस्ति सत्यं न तद्यच्छलमभ्युपैति॥

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१

ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
तुलयाम लेनापि न स्वर्ग नापुनर्भवम्।
भगवत्संगिसंगस्य मर्त्यानां किमुताशीषः॥

नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥
( वेदव्यास )

卐 वर्षम्-१२ 卐 अंकः-२२ ( २८६ ) नवदेहली 卐 १६ मईमासः २०२३तः ३१ मईमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## पतंजलि-विश्वविद्यालयस्य, पतंजलि-आयुर्वेद महाविद्यालयस्य च वार्षिकोत्सवः कार्यक्रमः

हरिद्वारम्। अनयोः संयुक्त तत्वावधाने अभ्युदय वार्षिकोत्सवस्य 2023 आयोजनं पतंजलि विश्वविद्यालयस्य सभागारे सांस्कृतिक महोत्सव रूपेण विहितम् । कार्यक्रमे विश्वविद्यालयस्य माननीय कुलपतिः श्रद्धेयः आचार्य बालकृष्णः स्वकीये आर्शीवचने कथितवान् यत् विद्यार्थिजीवनस्य



अभ्युदयः आध्यात्मिकतायाः भौतिकतायाश्च समन्वयेनैव सम्भवति । प्रतिकुलपतिः कथितवान् यत् विश्वविद्यालयः राष्ट्र उत्थाने सदैव तत्परः अत्रत्यः विद्यार्थी च संस्कृतेः अग्रदूतः ।

पतंजलि विश्वविद्यालयस्य कुलानुशासिका एवं च संकायाध्यक्षा- मानविकी एवं प्राच्य विद्या संकाय साध्वी देवप्रिया छात्र-छात्राभ्यः तदुज्जवल भविष्याय शुभकामनाः दत्तवती। उद्घाटनं दीप प्रज्ज्वलनेन मन्त्रपाठेन च अभवत्। तत्र विश्वविद्यालयस्य प्रति-कुलपतिः प्रो0 महावीर अग्रवालः, डॉ. अनिलः, साध्वी देवसुमना, स्वामी परमार्थदेवः च उपस्थिताः। उपस्थितस्य अतिथिगणस्य पुष्पगुच्छेन स्वागतं जात म् । कार्यक्रमे विभिन्न प्रतियोगिताः- यथा समूह गायनं, समूह नृत्यं, नाटकं, युगल गीतं, रंगोली च आयोजिताः।

शेषभागः तृतीयेपुटे

## महर्षिपाणिनिसंस्कृत-विश्वविद्यालयस्य कार्यपरिषदःउपवेशनं सुसम्पन्नम्

(डॉ.दिनेश चौबे) उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य कार्यपरिषदः उपवेशनं मेमासस्य ०२ तमेदिनाङ्के पूर्वाह्ने ११:०० वादनतः अभवत् । सभायाः अध्यक्षता माननीयकुलपतिः आचार्यविजयकुमारसीजीमहोदयः अकरोत्। सभायाः आरम्भे सर्वैः कार्यपरिषद् सदस्यैः उच्चशिक्षामन्त्रिः डॉ. मोहनयादवस्य आभारम् अभिनन्दनं च कृत्वा शुभकामनाःप्रदत्ताः यत्




तस्यैव अथकपरिश्रमस्य भागीरथप्रयासस्य च कारणेन विश्वविद्यालयस्य वार्षिकं अनुरक्षण अनुदानध नं २.२७ कोटिरुप्यकैः वर्धित्त्वा ५ कोटिरूप्यकाणि यावज्जातम् । एतेन सह माननीयमन्त्रिमहोदयस्य प्रयत्नात् निर्माणानुदानधनमपि प्राप्तुं सम्भावना वर्तते। दीक्षांतसमारोहस्य अनुमोदनं कार्यपरिषदि अभवत। दीक्षांतसमारोहः मेमासस्य अन्तिमसप्ताहे भविष्यति।

विश्वविद्यालये कार्यं कुर्वतां योग्यानां दैनिकवेतनभुक्कर्मचारिणां कृते स्थायीश्रमिकयोजनायाः लाभं प्रदातुं निर्णयः कृतः तथा च तेषां प्रकरणानां निवारणाय नियमितीकरणाय च सक्षमः प्राधिकारिः मन्त्रालयं, भोपालं गत्वा उच्चस्तरात् प्रकरणानां समाधानं करिष्यति।

विश्वविद्यालयशिक्षणविभागानां संस्कृतस्य पुराणेतिहासस्य च सहायकप्राध्यापकस्य अनुसूचितजनजातिवर्गे चयनप्रक्रियायाः परिणामान् अपि कार्यपरिषद् अनुमोदितवती अस्ति। कार्यपरिषदि राज्यपालमहोदयेन नामांकिताः सदस्याः श्रीराजेन्द्रझालानी, श्रीसुशीलवाडिया, डॉ. केसरसिंह चौहान, डॉ. किरणशर्मा, डॉ. विद्या जोशी, अपरनिदेशकः उच्चशिक्षा विभागः, डॉ. अर्पणभारद्वाजः एवञ्च विश्वविद्यालयस्य प्राध्यापकाः डॉ. उपेन्द्रभार्गवमहोदयः डॉ. संकल्पमिश्रमहोदयः उपस्थिताः आसन् सभायां कुलसचिवः डॉ. दिलीपसोनीमहोदयः , वित्तनियंत्रकः श्रीदिनेशचौरसियामहोदयः विशेषामन्त्रितसदस्यरूपेण उपस्थितः आसीत्।

## राजस्थानसंस्कृतअकादम्याः नवनियुक्तः निदेशकः डॉ. राजकुमारजोशी

जयपुर। महोदयस्यास्य कार्यभारग्रहणं खादी ग्रामोद्योगपरिषदः अध्यक्षेण बृजकिशोर शर्मणा एवं च अकादमी अध्यक्षया डॉ. सरोज कोचरया कारितम् ।तत्पूर्व वैदिक विद्वद्भिः मंगलाचरणं, सरस्वती पूजनं च । बृजकिशोर शर्मा कथितवान् यत् डॉ. राजकुमार जोशी संस्कृतस्य उत्थाने विगत वर्षेभ्यः प्रयत्नरतः । अस्य अनुभवलाभ अकादम्यै नूनं प्राप्स्यते । अकादमी अध्यक्षा डॉ.



सरोज कोचरः अकादमी द्वारा पाण्डुलिपिसंरक्षणसंवर्द्धनाय विहितप्रयासानां विषये उक्त्वा सर्वे विद्वांसः सार्थक सहयोगाय प्रार्थिताः। अवसरेस्मिन् डॉ. राजेश्वरी भट्टः, प्रो. विनोद शास्त्री, पूर्व कुलपतिः, ज.रा. राजस्थान संस्कृत विश्वविद्यालयः, वरिष्ठ पत्रकारः , प्रसिद्धः शिक्षाविद् डॉ. एलसी भारतीयः, जयपुरम्, प्रो. श्रीकृष्ण शर्मा, सम्पादकः, स्वरमंगला, सांवरमल शर्मा, प्रो. ताराशंकर पाण्डेयः कुलपतिः, कल्लाजी वेदविश्वविद्यालयः, निम्बाहेडा, प्रो. विनोद विहारी,

शेषभागः तृतीयेपुटे

## तुलसीमठस्य एवं पञ्चामृतम् धाम्नश्च संयुक्ततत्त्वाधाने 'रम्या रामायणी कथायाः' भव्यम् आयोजनम्

तत्र बक्सरधामतः समागतस्य भक्तशिरोमणि श्रीरामचरित्रदासस्य कथाव्यासस्य मुखारविन्देन भरत चरित्रिकं पावन पीयूष पानं कृत्वा भक्तगणः आनंदितः। १५ मई२०२३ तमे दिनांके पद्मश्री



प्रो. अभिराज राजेन्द्रमिश्रः स्ववैदुष्यपूर्णे व्याख्याने आविश्वे प्रचलितायाः रम्या रामायणी कथायाः मनोहर प्रस्तुतिर्विहिता । श्री शिवाकान्त द्विवेदी, जिलाधिकारी ,बरेली अस्य भक्तिः एवं वैदुष्य पूर्ण समारोहस्य भूरि भूरि प्रशंसां कृतवान् । अवसरेस्मिन् तुलसीमठ- कल्पतरु पुस्तकस्य विमोचनं कथा व्यास द्वारा सम्पन्नम्। यत्र मठे क्रियमाणायाः नित्य पूजासाधनायाः क्रमः वर्णितः । अपरं पुस्तकम् आचार्या कमला पाण्डेय द्वारा वाल्मीकि रामायणस्य सुन्दरकाण्डस्य समीक्षेत्यस्य विमोचनमपि जातम्। पंचामृतम् धाम्नः प्रबन्धः निदेशकः कैप्टन महेशचन्द्र पाण्डेयः तथा स्वामी नीरजनयनदासः आचार्यम् अभिराजं राजेन्द्रमिश्रं पञ्चामृतम् सपर्या सम्मानितवन्तौ, प्रो संतोष कुमार शुक्लः,डा अरविन्द कुमार तिवारी,डा शम्भू त्रिपाठी, डा.सारिका मिश्रा इत्येभ्यः पञ्चामृतम् संस्कृत सेवा सम्मानं, डा पाञ्चजन्य पाण्डेयाय पञ्चामृतम् धन्वन्तरि सम्मानं,डा वन्दना केशरिणे पञ्चामृतम् मोहिनी कला सम्मानं च प्रदत्तम। सर्वेषां विदुषां एवम् अतिथीनां च स्वागतं महन्त स्वामी नीरजनयनदासः अकरोत। आचार्या कमला पाण्डेयः सम्मान पत्र वाचनमरोत् ।संचालनं श्री सतीश वसिष्ठः तथा कृतज्ञता ज्ञापनं ऋषभ भारद्वाजश्चाकरोत् ।

# संस्कृतजलेन मलिनबुद्धिः स्वच्छा भवति - विनयश्रीवास्तवः

वार्ताहरः - सचिन शर्मा



उत्तरप्रदेशसंस्कृतसंस्था लखनऊद्वारा २०२३ मईमासे २० दिवसीयानां संस्कृतभाषाशिक्षणकक्षाणाम् उद्घाटनं कृतम् । सर्वप्रथमं देववाणीं गीतं, संस्थानगीतिकायाः परं सरस्वतीवंदनमभवत्। संस्कृतभाषायां रुचिः, परीक्षा, समभाषणम् इत्यादीनि उद्देश्यानि साकारीकर्तुम् आगतैः छात्रैः स्वविचाराः प्रकटीकृताः । अयं उपक्रमः वस्तुतः प्रशंसनीयः अस्ति।

आधुनिककाले संस्कृतभाषायाः उपयोगितायाः प्रकाशनं कृत्वा शास्त्रसंरक्षणे संस्कृतस्य मुख्यभूमिका प्रस्ताविता आसीत् । भाषाविज्ञानानुसारं संस्कृतस्य महत्त्वं कथितम् । जिलागाजियाबादस्य संस्थानप्रशिक्षक शशिकांत महोदयेन कक्षैषा संचाल्यते । कक्षैषा सायं ०८:०० - ०९:०० वादनपर्यन्तं प्रचलति। शशिकान्त महोदयः छात्रान् वर्णमालाज्ञानं, संस्कृतस्य सूक्ष्मतां च पाठितवान। कक्षायामुपस्थितेषु सुषमा, प्रीतिः, आकाश, कुसुमलता, अमित, लक्ष्मी, माधुरी, सुनील, सरिता, भानु, मिनी, सुन्दर इत्यादिभिः छात्रैः स्वविचाराः प्रकटिताः। प्रतिभागिभ्यः धन्यवादं दत्त्वा प्रशिक्षणसंयोजकः श्री धीरज मैठाणी संस्थायाः योजनायाः विषये विस्तरेण व्याख्यातवान। सः अवदत् यत् प्रतिमासं २ तः ३ सहस्रं छात्राः संस्कृतभाषां शिक्षन्ते। एताः कक्षाः उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, प्रधानपदाधिकारी डॉ. दिनेशमिश्रः, सर्वेयरः डॉ. चन्द्रकला शाक्यः, प्रशिक्षणप्रमुखः सुधिष्ठ मिश्रः, कक्षानिरीक्षणं समन्वयक दिव्य रंजनः राधा शर्मा च कृतवन्तः। ऑनलाइन माध्यमद्वारा संचालिते कक्षायामस्यां ५० छात्रैः सह, संस्थायाः पदाधिकारिणः,पूर्वः आईपीएस शिवप्रसादसिंहः, आभा ,कृतिका इत्यादयः उपस्थिताः आसन्।

एतासु कक्षासु अन्ते परीक्षा अपि भविष्यति । उत्तीर्णवद्भ्यः प्रमाणपत्राणाम् वितरणस्य व्यवस्थापि अस्ति ।

एतावता बहवः उपकृताः। विशेषतः ये विद्यालयादिषु TGT/PGT इत्यनयोः कृते सज्जतां कुर्वन्ति, तेऽप्यत्र पठितुमागच्छन्ति । एतया योजनया अग्रेऽपि उपकृताः भविष्यन्ति एव । शीघ्रमेव तृतीयस्तरस्यापि शुभारम्भः भविष्यति । पाठ्यक्रमनिर्माणं जातम् अस्ति। शीघ्रमेव तस्य आरम्भः अपि भविष्यति। ये एतां निःशुल्क- कक्षामागन्तुकामाः ते जनाः

“sanskritsambhashan.com” इति लिंक उद्घाट्य तत्र स्वानुकूलतया मासं समयं च चित्वा स्वस्य नामांकनं कारयितुं शक्नुवन्ति । ये प्रथमस्तरं पठितवन्तः विशेषतः तेभ्यः अन्येभ्यश्च द्वितीयस्तरस्य प्रशिक्षणमपि संस्थानेन दीयते। परीक्षायाम् ३३% उत्तीर्णवद्भ्यः शिक्षार्थिभ्यः ७५% उपस्थितेभ्यः प्रशिक्षुभ्यः प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यमेन प्रेषणव्यवस्था अस्ति। उत्तरप्रदेशसंस्कृत संस्थान शीघ्रमेव “गृहे गृहे संस्कृतम्” इति योजनायाः कक्ष्याः समारम्भं कृत्वा संस्कृतस्य प्रचारे प्रसारे च किमपि विशिष्ट योगदानं दास्यति इति सम्भावनास्ति । शीघ्रमेव तृतीयस्तरोऽपि आरप्स्यते ।

निःशुल्क नामांकन कर्तुमिच्छन्ति तेभ्यः नामांकनलिंक “https://sanskritsambhashan.com @ seco nd_level_reg.php” इत्यस्ति ।

# डीएवी उत्तरप्रदेश ‘अ’ परिक्षेत्रे त्रिदिवसीया क्षमतासंवर्धनकार्यक्रमः समायोजितः

(वत्सदेशराजशर्मा)

सम्भल जनपदस्य बबरालानगरस्थ डीएवी फर्टिलाइजर पब्लिक विद्यालये विज्ञान, आङ्गल, संस्कृत विषयाध्यापकानां कृते त्रिदिवसीया कार्यशालायाः गुरुवासरे सम्पूर्तिः सञ्जाता। अस्याः



क्षमता संवर्धन कार्यशालायाः डीएवी शैक्षिकोउत्कृष्टताकेन्द्र, नवदेहली द्वारा उत्तरप्रदेश परिक्षेत्रम् अ इत्यस्य षट् विद्यालयानां संस्कृतभाषा, आङ्गलभाषा, विज्ञानविषयस्य शिक्षकाणां कृते आयोजनं कृतमासीत्। कार्यशालायाः शुभारम्भः मे मासस्य पञ्चदश दिनाङ्के उत्तर प्रदेश ‘अ’ परिक्षेत्रस्य क्षेत्राधिकारिणा श्रीमदानन्दस्वरूप सारस्वतमहोदयः वैदिक यज्ञेन सह कृतवान्। कार्यक्रमस्यारम्भे उद्घाटनसत्रे आयोजकविद्यालयस्य प्रधानाचार्य महोदयः श्री आनन्दस्वरूप सारस्वतमहोदयः उक्तवान् यत् प्रत्येकः विषयः विभिन्नगतिविधिमाध्यमेन पाठनीयः एवञ्च सा विधिरपि छात्रेभ्यः रुचिपूर्णा स्यात् एवं करणीयम। विषयं वास्तविकजीवनेन सह योजनाय शिक्षकाः प्रेरिताः तैः।

मुख्यातिथिरूपेण औरैयाजनपदस्थ गेल डीएवी मॉडल विद्यालय, दिबियापुर इति विद्यालयस्य प्रधानचार्य श्री राजीव कुमार पाण्डेयः महाभागः उपस्थितः आसीत्। अस्मिन् त्रिदिवसीयां कार्यशालायां डीएवी पब्लिक विद्यालयः, बीना परियोजना, गेल डीएवी मॉडल विद्यालय, गेल डीएवी पब्लिक विद्यालयः, दिबियापुर, डीएवी एनयूपीपीएल, कर्णपुरः आयोजक विद्यालयः डीएवी फर्टिलाइजर पब्लिक विद्यालयः, बबराला समेत्य अष्टाविंशतिः अध्यापकाः अध्यापिकाश्च प्रतिभागिरूपेण भागं गृहीतवन्तः।

कार्यक्रमस्य सम्पूर्ति सत्रे प्रतीभागीनां अनुभवकथनपूर्वकं मुख्यातिथिमहोदयस्य उद्बोधनं क्षेत्राधिकारिमहोदयस्य मार्गदर्शनेन सह प्रमाणपत्र वितरणं च अभवत्। इति शुभम्।

# एकादशी श्रीमद्भगवद्गीता दशम-राष्ट्रिया व्याख्यानगोष्ठी सम्पन्ना

वार्ताप्रेषकः- डॉ. मूलचन्द्र-शुक्लः

रामनगरम् । संस्कृतविभागः, इन्दिरागान्धी राष्ट्रिय-जनजातीय- विश्वविद्यालयः,अमरकण्टक- मध्यप्रदेशः, पी.एन.जी. राजकीय-स्नातकोत्तर-महाविद्यालयः,रामनगर-नैनीताल-उत्तराखण्डः, चातुर्वेद -संस्कृतप्रचार-संस्थानं, काशी, उत्तरप्रदेशः इत्येतेषां संयुक्ततत्त्वावधाने आनलाईन एकादशी श्रीमद्भगवद्गीता पाक्षिकी दशमी व्याख्यानगोष्ठी 15/5/2023 दिनाङ्के सफलतापूर्वकं सम्पन्नतां याता। कार्यक्रमस्य सञ्चालनम् अकरोत् संस्कृतसमुपासकः कार्यक्रमस्य संयुक्त-संयोजको डॉ. सचिनदेवद्विवेदमहोदयः, सहायकाचार्यः,संस्कृतविभागः, इन्दिरागान्धि- राष्ट्रिय-जनजातीय- विश्वविद्यालयः, अमरकण्टक- मध्यप्रदेशः, अस्माकं परम्परानुसारेण विघ्नविनाशाय मङ्गलाचरणं वाराणसीस्थ-आचार्येण रत्नाकरमिश्रेण विहितम् । गीताश्लोकपाठमकरोत् डॉ. अम्बरीषमिश्रः ।

कार्यक्रमस्य समन्वयकः प्राचार्यः, राजकीयस्नातकोत्तरमहाविद्यालयः रामनगरम् ,नैनीतालम् ,उत्तराखण्डः , प्रोफेसर एम. सी. पाण्डेमहोदयः प्रस्तावनापुरस्सरं स्वागतभाषणं प्रस्तुतवान् ।तेन प्रस्ताविकोद्बोधने उच्यते यत् गीता सर्वसमाजस्य कल्याणमार्गमेव प्रस्तौति तथा च सा अध्यात्म-समाजादिदृष्ट्या सर्वविधप्रबन्धनस्य मार्गमन्वेषयति।




कार्यक्रमेऽस्मिन् मुख्यवक्तृरूपेण प्रोफेसर-जितेन्द्रकुमारशर्मा सङ्कायाध्यक्षः अध्यक्षश्च, योगविज्ञानविभागः, इन्दिरागान्धी राष्ट्रिय-जनजातीय-विश्वविद्यालयः, अमरकण्टकम्, एतेन “गीतायां समत्वयोगः,समकालिकविमर्शः” इति विषये प्रोक्तं यत् श्यदा दुःखानाम् अनुभवं भवति तदा शास्त्राणाम् अध्ययनं करणीयम। अर्थात् दुःखानि न आगच्छेयुः तदर्थं पूर्वमेव शास्त्राणि अध्येतव्यानि । अनेन गीतायां भगवता श्रीकृष्णेनोक्तं समत्वयोग उच्यते यत् भो धनञ्जय आसक्तिं विहाय सिद्धि-असिद्ध्योः कर्तव्याकर्तव्ययोश्च विचारान् परित्यज्य कर्तव्यकर्माणि कुर्वन् समतास्थितौ भवतु -षसिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यतेष तेनोक्तं च साहित्य-दर्शनयोः संयोजनेन विशदरूपेण प्रकृतेरुपादानस्य संरक्षणं विधेयम् ।

विशिष्टवक्तृरूपेण प्रोफेसर- विनोदकुमारगुप्तमहोदयः आचार्यः उपनिदेशकश्च ,मानविकी विद्याशाखा, उत्तरप्रदेश- राजर्षिटण्डन-मुक्त -विश्वविद्यालयः, प्रयागराजः अयं आचार्यः “गीतायाम् आसुरी सम्पत्” इत्यस्मिन् विषये उक्तवान् यत् मनुष्यः यदा कदापि अनुचितं कार्यं करोति तदा एकक्षणं तु आयाति यदा सः पश्चातापं करोति। अतः उचितम् अनुचितं वा विचिन्त्य अस्माभिः कार्यं करणीयम् इत्यादिकं मार्गदर्शनं कृतवान्। अन्ते तेन आसुरीप्रकृतिकजनानां गीतोक्तं लक्षणं प्रस्तूयते-आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः।

यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ।।

सभाध्यक्षरूपेण प्रो. आलोक श्रोत्रियः, विभागाध्यक्षः सङ्कायाध्यक्षश्च मानविकी एवं भाषासङ्कायः, अधिष्ठातृ- अकादमिकः,इन्दिरागान्धी राष्ट्रिय- जनजातीय -विश्वविद्यालयः, मध्यप्रदेशः एतेन स्वीये व्याख्याने उक्तं यत् यदा अस्माभिः आत्मसंयमपूर्वकं परोपकारादिनैतिककार्यं च क्रियते तदा बाह्याडम्बरविषयस्य आवश्यकतैव न भवितुमर्हति।

दम्भेनाविधिपूर्वकम्।।

कार्यक्रमस्य अन्ते धन्यवादं विज्ञापयति कार्यक्रमस्य सहसमन्वयकः डॉ० मूलचन्द्रशुक्लः,सहायकाचार्यः संस्कृतम्, पी० एन० जी० राजकीयस्नातकोत्तर- महाविद्यालयः,रामनगरम्, उत्तराखण्डः।

शुभकामनासन्देशं प्रस्तौति कार्यक्रमस्य सूत्रधारः संयोजकश्च डॉ० चन्द्रकान्तदत्तशुक्लवर्यः, सहायकाचार्यः, राजकीयस्नातकोत्तर- महाविद्यालयः, मुहम्मदाबाद-गोहना, मऊ उत्तरप्रदेशः। कार्यक्रमे प्रो.जया तिवारी, प्रो. भगवत् शरणशुक्लः, प्रोफे. जी. सी. पन्तः, प्रो.वन्दनापाण्डेया, प्रो.मञ्जुलता, डॉ रामप्रतापमिश्रः, डॉ. आभा द्विवेदी, डॉ उमाकान्तशुक्लः, डॉ प्राङ्गेशकुमारमिश्रः, डॉ त्र्यम्बकनाथपाण्डेयः, डॉ अम्बरीषमिश्रः, डा. योगेशचन्द्रः, डॉ.अजयसक्सेना,डॉ. अनीता जोशी, डॉ. जे. पी. त्यागी, डॉ. कुलदीपमैन्दोला, डॉ. आरुणेयमिश्रः, डा. नितिन ढोमने, डॉ गीता जोशी, डॉ रजनीश शुक्लः, डॉ सन्ध्या ठाकुरः, डॉ. अवनीन्द्रकुमारपाण्डेयः, डा. रितेश चतुर्वेदी, डॉ. अशोक द्विवेदी, डॉ. मेघाशर्मा, डॉ. सविता ओझा, अखिलेश, मो. बेलाल, शिवानी, सन्ध्या, गायत्री, , प्रियंका यादव,आंचल गुप्ता, अनन्या, महक, रोशनः इत्यादयः बहवः प्राध्यापक-प्राध्यापिकाः विद्यार्थिनः जिज्ञासवश्च उपस्थिता आसन्। विश्वसंस्कृतकुटुम्बकम् इत्याख्ये फेसबुकसमूहे सजीवप्रसारणे ३०० जनाः सम्मिलिता आसन्।



# शिक्षकाणां कौशलं सम्पादनाय पञ्चदिवसीया कार्यशाला सम्पन्ना

जयपुरम्-सञ्जयशिक्षकप्रशिक्षण महाविद्यालयस्य प्रार्थनासभागारे दिनाङ्क १२ मईतः १६ मईपर्यन्तं बी.एड. प्रथमवर्षः एवं डी.एल.एड. प्रथम एवं द्वितीय वर्षस्य प्रशिक्षणार्थिणां कृते चतुर्दिवसीय-शिक्षण-सामग्री-निर्माण-कार्यशालायाः आयोजनं महाविद्यालयस्य सहायकाचार्य एवं संयोजिका डॉ०सुमनलता-यादवमहोदयायाः सफलनिर्देशने समायोजितम्।





कार्यशालायाः शुभारम्भः महाविद्यालयस्य प्राचार्या डा० सुनीताभार्गवः दीपप्रज्ज्वलनं कृत्वा कृतवती। अस्याः कार्यशालायाः मुख्योद्देश्यं आसीत् यत् छात्राध्यापकानां, तकनीकीविकासः, सृजनात्मकचिन्तनस्यविकासः, तथा शिक्षणे सारल्यमानेतु कौशलवर्धनञ्च कर्तुं शिक्षकैः नूनमेव यतनीयम्। यस्मात् वयं वर्तमानकालिक-सामाजिकविषयाणाम् अद्यतनं ज्ञानं प्राप्नुमः। अतः शिक्षकेभ्यः अध्यापनसमये शिक्षणसामग्रीनिर्माणं शिक्षणे अन्तःक्रियाद्वारा शिक्षणं स्थायित्वं करोति, येन समयस्य अपव्ययः न भवति तथा च अधिकतमं ज्ञानं अल्पकाले एव प्राप्तं भवति। महाविद्यालयस्य प्राचार्यः डॉ. सुनीताभार्गवः अवदत् यत् मानवशरीरे स्थिताः इन्द्रियाणि एव ज्ञानस्य द्वाराणि सन्ति येषां माध्यमेन वयं ज्ञानं प्राप्नुमः। तस्मिन् एव क्रमे विविधसंकायविषयाणां प्रवक्तृभिः प्रशिक्षुभ्यः सैद्धान्तिकरूपेण प्रयोगात्मकरूपेण च शिक्षणसामग्रीनिर्माणं कृत्वा आकर्षकं रोचकं च सामग्रीं निर्मातुं प्रेरितम्। कार्यशालायां प्रशिक्षुभिः विभिन्नविषयैः (मानवहृदयम्,पवनचक्रिकां 2क्-3क् मॉडल, स्मार्टसिटी तथा भाषायां विभक्तेः प्रयोगः), चार्ट्इत्यादिभिः सह सम्बद्धाः कार्यरताः कार्यशीलाः च आदर्शाः निर्माय स्वस्य सृजनशीलतायाः परिचयं दत्तवन्तः, येषां कृते समस्तमहाविद्यालयपरिवारेण छात्राः बहु प्रशंसिताः अभवन्।कार्यशालायाः अन्तिमे दिने १६ मई २०२३ दिनाङ्के सर्वैः प्रशिक्षुभिः निर्मितं शिक्षणसामग्री प्रदर्शन्याः माध्यमेन प्रदर्शिता, यस्य उद्घाटनं महाविद्यालयस्य प्राचार्या डॉ. सुनीता भार्गवेन पट्टिकां कर्तयित्वा कृतम्, यत् अतीव रोचकं, आकर्षकं, प्रशंसनीयं चासीत्। अस्मिन् अवसरे सा प्रशिक्षुभ्यः अवदत् यत् बालकानां शिक्षणस्य रुचिं जनयितुं भविष्ये, भविष्ये, तेषां कार्यस्थानं गत्वा शिक्षणसामग्रीणां उपयोगः करणीयः। येन बालकाः न्यूने समये अधिकं ज्ञानार्जनमधिगमञ्च कर्तुं सक्षमाः भवेयुः तस्य जीवने प्रयोगं कर्तुमपि शक्नुयुः। अस्यां कार्यशालायां डॉ० अर्चनामेहन्दीरत्ता, डॉ० महेशकुमारपारीकः, डॉ०रीटाझाझडिया, श्रीमती ममताशर्मा, श्रीशशिकान्तशर्मा एवं समस्तमहाविद्यालयपरिवारस्य सदस्याः चोपस्थिताः समभवन्।

---

प्रथमपुटस्य शेषभागः

## राजस्थानसंस्कृतअकादम्याः....

सीताराम दोतोलिया, राजस्थान विश्वविद्यालयस्य छात्रसंघस्य पूर्व अध्यक्षः डॉ. राजपाल शर्मा, डॉ. जगदीश त्रिपाठी, डॉ. सूरजमल गौतमः, पूर्व संभागीय शिक्षा अधिकारी, गजानन्द शर्मा, अनिल कलावटिया, राजेन्द्र हंसः, जिल्ला शिक्षा अधिकारी, पं. जवाहरलाल नेहरू बाल साहित्य अकादमी, अध्यक्षः जयपुरस्य इकराम राजस्थानी, राजस्थान ललित कला अकादमी, जयपुरस्य सचिवः डॉ. रजनीश हर्षः, पं. जवाहर लाल नेहरू बाल साहित्य अकादम्याः सचिवः राजेन्द्र मोहन शर्मा, आल इण्डिया ब्राह्मण फेडरेशनसचिवः रमेश ओझा, गोपालकृष्ण गौडः, प्रधान सम्पादकः (ब्रह्मघोष एवं राष्ट्रीय समन्वयक राजीव गाँधी स्टडी सर्किल) डॉ. सतीश कुमार रायः, सत्येन्द्र मीणा उप जिल्ला प्रमुख बून्दी, जयपुर नगर निगमपार्षदः नीरज अग्रवालः, संजय ओसवालः (ओसवाल ग्रुप, एडवोकेट, राजस्थानम्) हाईकोर्ट हेमन्त सिंह शेखावतः एवं प्रदेशस्य अनेक संभागीयाः संस्कृत मनीषिणः एवं संस्कृतानुरागिणश्च उपस्थिताः आसन्। अकादमी निदेशकः डॉ. राजकुमार जोशी प्रदेशं संस्कृत शिक्षायाम् अग्रणिनं प्रदेशम् उक्त्वा संस्कृत अकादम्याः रचनात्मक सृजनात्मक कार्याणि अग्रे नेतुम् इच्छा शक्तिं व्यक्ती कुर्वन् मुख्यमंत्रिणम् अशोक गहलोतं , प्रति कृतज्ञतां एवं डॉ. कला एवं संस्कृति मंत्रिणं बी. डी. कल्लां च प्रति स्वीयम् आभारं ज्ञापितवान् ।

# संस्कृतसम्भाषणाय उत्तरप्रदेशसंस्कृतसंस्थानस्याद्वितीया कक्षा

वार्ताहरः-नूतनविष्णुः रेग्मी (प्रकृतिसाधुः)

उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ-द्वारा २०२३-तमवर्षस्य मईमासस्य अष्टमे दिनाङ्के विंशतिदिवसाय( प्रतिदिनं एकघण्टात्मककालाय ) प्रथमस्तरीयसंस्कृतभाषाशिक्षणस्य एवं द्वितीयस्तरस्य च शुभारम्भः (समुद्घाटनसमारोहः)बहुत्र संजातः।

एतस्मिन् एवं क्रमे नेपालस्य गैंडाकोटतः अपि उत्तरप्रदेशसंस्कृतस्थानस्य भाषाप्रशिक्षकः नूतनविष्णुः रेग्मी गूगलमीट्माध्यमेन सायं ६ वादने प्रथमस्तरीयसंस्कृतभाषाशिक्षणस्य कक्ष्यायाः शुभारम्भमकरोत्।यत्र बहवः पंजीकृतच्छात्राः विभिन्नेभ्यः स्थानेभ्यः पठितुमागताः।तत्र देशतः एवं विदेशत ः अपि ५० संस्कृतानुरागिणः समागतवन्तः। सर्वादौ मंगलमादाय नूतनविष्णुः रेग्मी (संस्कृतभाषाप्रशिक्षकः)संस्कृतकक्ष्यायाः








महत्वं किंचित् प्रतिपाद्य कक्ष्यायाः नियमान् अश्रावयत् ।सर्वे स्वपरिचयं संस्कृतपठनस्य कारणं चोक्तवन्तः।आदौ सः परिचयपाठं पाठयित्वा सः कः,सा का, तत् किम् च एतान् बिन्दून् शिबिरपद्धत्या सर्वान् बोधितवान्।सर्वे पाठितविषयं सम्यक् ज्ञात्वा तत्रैव अभ्यासमपि कृतवन्तः।अन्ते सर्वेषां जिज्ञासायाः उपशमनमपि तेन कृतम्।प्रथमस्तरीयकक्षा प्रतिदिनं सायम् ६ वादनतः ७ वादनपर्यन्तं वादनपर्यन्तं चलति। कक्ष्यैषा ३० मई २०२३ पर्यन्तम् चलिष्यति ।अन्ते परीक्षा अपि भविष्यति । उत्तीर्णवद्भ्यः प्रमाणपत्राणाम् वितरणस्य व्यवस्थापि संस्थानेन कृता अस्ति।उत्तरप्रदेशसंस्कृतसंस्थानेन संचालितकक्ष्याभिः एतावता बहवः उपकृताः।विशेषतः ये विद्यालयादिषु TGT/PGTइत्यनयोः कृते सज्जतां कुर्वन्ति तेऽप्यत्र पठितुमागच्छन्ति।एतया योजनया अग्रेऽपि जनाः उपकृताः भविष्यन्ति एव।शीघ्रमेव तृतीयस्तरस्यापि शुभारम्भः भविष्यति । तस्य पाठ्यक्रमनिर्माणम् अपि जातम् अस्ति ।शीघ्रमेव तस्य आरम्भः अपि भविष्यति इति सम्भावना।

ये एतां निःशुल्क-कक्षामागन्तुकामाः ते "“sanskritsambhashan.com”" इति लिंक् उद्घाट्य तत्र स्वानुकूलतया मासं (जून ,जुलै )२०२३ समयं च चीत्वा स्वस्य नामांकनं कारयितुं शक्नुवन्ति।ये प्रथमस्तरं पठितवन्तः विशेषतः तेभ्यः अन्येभ्यश्च द्वितीयस्तरस्य प्रशिक्षणमपि संस्थानेन दीयते। परीक्षायाम् ३३% उत्तीर्णवद्भ्यः शिक्षार्थिभ्यः ७५% उपस्थितेभ्यः प्रशिक्षुभ्यः प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यम्न प्रेषणव्यवस्था अस्ति। उत्तरप्रदेशसंस्कृत संस्थानं शीघ्रमेव "गृहे गृहे संस्कृतम् "इति योजनायाः समारम्भं कृत्वा संस्कृतस्य प्रचारे प्रसारे च किमपि विशिष्टं योगदानं दास्यति इति सम्भावना अस्ति । अस्मिन् मासे १३ प्रथमस्तरीयाः कक्षाः, ७ द्वितीयस्तरीयाः कक्षाः आहत्य २० कक्षाः सन्ति।तत्र ८९८+४९९= १३९७ छात्राः सन्ति ।तासु कक्षासु २० प्रशिक्षकाश्च सन्ति।ये द्वितीयस्तराय स्वस्य निःशुल्कं नामांकनं कर्तुमिच्छन्ति तेभ्यः नामांकनलिंक् “https://sanskritsambhashan.com/second_level_reg.php“इत्यस्ति।

---

प्रथमपुटस्य शेषभागः **पतंजलि-विश्वविद्यालयस्य...**

कार्यक्रमे नाटक प्रतियोगितायाः बी.ए.एम.एस.के., समूह गायने बी.ए. योग विज्ञान द्वितीय वर्षीयविद्यार्थिनः प्रथमं स्थानं प्राप्नुवन् ।

पतंजलि आयुर्वेद महाविद्यालयस्य प्राचार्यः डॉ. अनिलः, साध्वी देवसुमना, स्वामी परमार्थ देवः,



कुलानुशासकः स्वामी आर्षदेवः, कुलसचिवः डॉ. प्रवीण पुनिया, उपकुलसचिवः डॉ. निर्विकारः एवं च समस्त संकायाध्यक्षाः, अधिकारिणः एवं च प्राध्यापकगणः, कर्मयोगिनः, बी.एन.वाई.एस., बी.ए. एम.एस. छात्र-छात्राः एवं च शोधार्थिनः च उपस्थिताः कार्यक्रमे भारतीय शिक्षा परिषदः कार्यकारी अध्यक्षः श्री एन.पी. सिंहः, पतंजलि विश्वविद्यालयस्य कुलसचिवः भगिनी प्रवीण पूनिया, पतंजलि आयुर्वेद महाविद्यालयस्य प्राचार्यः प्रो. अनिल यादवः विजेतृप्रतिभागिभ्यः स्मृतिचिह्नं एवं च प्रमाणपत्रं प्रदत्तवान् । संचालन डॉ. नरेन्द्र सिंहेन कृतम् ।

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

साधारणशब्दैः धर्मस्य नैके अर्थाः भवन्ति येषु केचन इमे यथा कर्तव्यं, अहिंसा , सदाचरणं, सद्‌गुणाः श्चेति। धर्मस्य शाब्दिकः अर्थः 'धर्तुं योग्यः' सर्वाधिकं उचितधारणा, तन्नाम यः सर्वैः धारणीयः , अयं मानव धर्मः। धर्मः कश्चिदेकः परंपरां मन्यमानानां समूहः। एवं मान्यते यद् धर्मः, मानवे मानवत्वम् आदधाति। धर्मेण तात्पर्यं यत् मानवः समाजात् परस्थितौ अलौकिक शक्तौ अपि विश्वसेत्। यत्र पवित्रता, भक्तिः, श्रद्धा, भयं चेत्यादीनि तत्वानि सम्मिलितानि भवन्ति, यः अस्माभिः साधारण शब्दैर्धर्मः कथ्यते। धर्मः मनुष्ये मानवीय गुणानां वैचारिकस्रोतः, यदाचरणेन मनुष्यः स्वजीवनं चरितार्थं कर्तुं याति। मानवतायै न तु पर्याप्त संसाधननां आवश्यकता, न हि भावनायाः इत्येवं भावस्तु मनुष्यस्य आचरणे भवेदेव। ये गुणाः भावाश्च मनुष्यस्य आचरणे नायायुः नावशिष्यते तेषां किञ्चन प्रयोजनम् स धर्मः मनुष्ये जीवन महत्व स्पष्टीकरोति। पवित्र भावनाः उत्पादयति, एवं मानसिके अशैथिल्ये चिंताः दूरीकृत्य समाजविरोधि , धर्म विरोधि कार्यं प्रति विरोधभावनाम् उत्पादयति स इत्थं धर्मः व्यक्तेः व्यक्तित्व विकासं करोति। एवं च तं सुख समृद्धि हेतवे धार्मिक नियमानाम् अनुरूपम् आचरणाय प्रेरयति। धर्मः एकम् अलौकिक शक्तेर्नाम। यस्य प्रभावः मनुष्यस्य सामाजिक जीवने पतति। धर्ममहत्वं बोधयितुं प्रसिद्धः विद्वान् रॉबिनः कथयति यत् धर्मः केवलं मनुष्यजीवनस्य लक्ष्यस्य च चिंतन मात्रमेव न अपितु जीवन मूल्यानि संरक्षितुं साधनमपि वर्तते स डॉ.सर्वपल्ली राधाकृष्णनः अपि धर्मस्य महत्वं स्वीकुर्वन् लिखति यत् 'ईश्वरे मानव प्रकृतिः स्वपूर्ण संतुष्टिं प्राप्नोति।'। मनुष्ये अनेक सामाजिकानां तथा मानसिक गुणानां च विकासः भवति, यस्य कारणमिदं यत् धर्मस्य समाजे महत्वपूर्ण भूमिका वर्तते। धर्मस्य संबंधः एकया सर्वशक्तिमत्या अलौकिक सत्तया सम्बद्धः वर्ततेस अत एव अधिकांशेन व्यक्तिः स्वीयानि उचितानुचितानि कार्याणि कष्टानि विपत्तयः च ईश्वरीयम् इच्छात्मकं प्रतीकं मनुते।

यथा व्यक्तौ कष्टसमये अपूर्व शक्तेः विकासः भवति। मानव जीवने व्याप्त समस्यानां समाधानाय समाजे अनेकेषां संघटनानां संस्थानां च जन्म जातम्। धर्मः एव शक्तिः या व्यक्तौ आत्मविश्वासं जागर्तिस अतः मनुष्यः जन्मनो माध्यमेन सामाजिक समस्याभ्यः मुक्तिं प्राप्नोति। धर्मः समाजात् पृथक्कर्तुं न शक्यः परंतु वर्तमान समये मनुष्यः धर्मं स्व स्वार्थवशेन सत्ताप्राप्तये एवं च राजनीतये च अस्य उपयोगङ्कुरुते यद्वृत्तम् अत्यन्तं दुःखदम्।

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

'त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥
बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
मा न स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥

'This Brihaspati, with his resources of defence, helps his devotees cross their sorrows. He protects them from harm and hence men always call him for assistance. He never allows revilers of God live in comfort and completely destroys them.'"'Lord Brihaspati is known for accomplishing things in a simple way. Such a wonderful treasure granted by Lord Brihaspati, that is prized by the wise, that makes people radiant and makes them do auspicious deeds, and one that confers power and strength on people, may He confer such a great treasure on us too. '"'Those who derive sadistic pleasure in treachery, who try to grab food of opponents, who oppose gods at heart, who other than uttering mere words of peace, know nothing more about divine power- may we never be afraid of such thieves. May we always be protected by You from them.'

The Rig Veda 2.23.8/15/16

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥
न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते॥

'O! Brihaspati, Lord of Wisdom ! Those who offer oblations to you are guided along morally upright path and encouraged to do good deeds. They are protected by You. They incur no sin. You punish those who hate divinity and put an end to their wrath. Such is Your power and glory. '"' Brihaspati who administers things excellently , keeps away the violent forces from those protected by Him. Likewise they never commit sins or evil deeds that bring sorrow to one. No enemy can cause harm, injury or pain to such devotees. And no double-tongued fraudster can cheat them.'

The Rig Veda 2.23.4&5

**संकलन : एस.वासुदेव रावः**

# जर्ज बकले दर्शनसमीक्षणम्

## A review of George Berkeley's views



**-डा. प्रदीप्तकुमारनन्दः**
उपाचार्यः, सर्वदर्शन-विभागमुख्यश्च
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,श्रीविहारः,पुरी ३

**शोधसारः-**

भारतीयाः खलु आध्यात्मिकवादिन ईश्वर-जीव-जगतां विषये चिन्तयन्ति । आत्मतत्त्वानुसन्धाने प्राच्यानां मतिः सदैव सुदृढा दृश्यते। इमे पाश्चात्या यदिवा आत्मतत्त्व-जगत्तत्त्वविषये च यत्र तत्र किमपि कथयन्ति,किन्तु एतेषां विचारप्रक्रिया प्राच्यतः संपूर्णभिन्ना । भौतिकवस्तूनां विचारे तेषां समयोऽतिवाहितः । स्थूल-बाह्यप्रत्ययचिन्तने निरन्तर-कुशलाः पाश्चात्याः खलु सुक्ष्मान्तरिकचिन्तनकर्तुमसमर्था चिन्त्यन्ते । इदं बर्कलेदर्शनं पाश्चात्यदर्शनेष्वन्तर्भूतम्। अत्र पूर्वप्रवर्तितमतानां खण्डनं स्वपक्षमण्डनं च कृत्वा विचारप्रक्रिया प्रचलति । अमूर्तप्रत्ययवादखण्डनम्, जडद्रव्यखण्डनं,भाषाविश्लेषणादीनां बहुविषयाः मुख्यरूपेणात्र समुपस्थापिताः दृश्यन्ते। पाश्चात्येषु अन्यतमः सुदूरप्रसारि-स्वकीयमतमुपस्थापितवानयमाचार्यो बर्कले महोदयः । सुतरामेतद्दर्शनमवश्यं विचारणीयं प्रतिभाति। स्थालीपुलाकन्यायेन दर्शं दर्शं केनापि सारल्येन बर्कलेमतमुपस्थापयाष्यामीति मनसि विचिन्त्यऽग्रेसरामि ।

**कूटशब्दाः-**

बर्कले, अमूर्तप्रत्ययः, जडद्रव्यम्, भाषा-विश्लेषणम्

**प्रासंगिकोपक्रमः-**

Bishop (George) Berkely (१६८५-१७५३) प्रसिद्धं नाम। अद्‌भूतं व्यक्तित्वम्। मान्यो दार्शनिको विज्ञानवादस्य ।[1] 'क्लोइन'नगरस्य पाद्री Bishop पूजार्हः।[2] इन्द्रियानुभववादस्य अग्रगामियोद्धा जर्ज बर्केलिः १२/०३/१६८५ खीष्टाब्दे 'आयारलाण्ड Ireland' स्थित 'किलकेनि Kilkenny' नामके क्षेत्रे स्वास्तित्वसंपन्नो बभूव।[3] स खलु प्रथमः पूर्वाचार्य-लिखितानि शास्त्राणि सम्यगधीत्य तानि सर्वाणि तत्याज ।

बर्कले 'विलियम बर्कले' इत्यस्य ज्येष्ठः पुत्रः आसीत् । पिता विलियम बर्कले तत्रत्य "सज्जनः"[4] इति श्रूयते । १६९६ तमे वर्षे किल्केनी-महाविद्यालये, १७०० तमे वर्षे डब्लिन्-नगरस्य ट्रिनिटी-महाविद्यालये च प्रवेशं प्राप्तवान् सः, तत्रैव बी.ए. degree कृत्वा 1704 तमे फेलोशिप् प्राप्तवान् । पश्चात्तेन भौतिकपदार्थप्रसंगे समीक्षात्मकमध्ययनं चकार । तच्चिन्तने मुख्याः प्रभावोऽनुभववादः आसीत् । लक् प्रवर्तितवादस्य पुनरीक्षणं समाप्य सयौक्तिकं विज्ञानवादः प्रतिष्ठापितः ।[5]

पाश्चात्यदर्शनस्य इतिहासे बर्कलेदर्शनस्य वैज्ञानिकत्वमतीव महत्त्वपूर्णमस्ति । अनेन विज्ञानवादः प्रतिष्ठापितः । विज्ञानवादस्य अयमारम्भः सामान्यतया प्लेटोतः इति मन्यते । यद्यपि बर्कले-पूर्ववर्तिनो दार्शनिकाः प्लेटोप्रभृतयो विज्ञानवादिनोऽभवन्, परन्तु अनुभव-विज्ञानयोः याथार्थ्यं न केनापि प्रमाणीकृतम् । विज्ञानविषयक-द्वन्द्वं सम्भवतो न निरस्तम् । भिन्नार्थेन इतः पूर्वं भौतिकवस्तूनां जडद्रव्याणां वा केनापि पूर्णतया निषिद्धं न कृतम। एषः सज्जनो बर्कले-महोदयः जडद्रव्यं सम्पूर्णतया खण्डयित्वा अध्यात्मवादस्य प्रत्ययवादस्य[6] वा संस्थापनं विहितम् ।

**Berkeley इत्यस्य मुख्यग्रन्थाः-**

बर्कले महोदयस्य प्राधान्येन दशग्रन्थाः प्रसिद्धाः दृश्यन्ते।[7] वक्ष्यमाणे तेषां नामानि प्रकाशनसमयाश्च प्रदत्तानि सन्ति।

1. Common Place Book (सामान्यस्थानपुस्तकम्) 1705
2. An Essay Towards a New Theory of Vision (दृष्टेः नूतनसिद्धान्तस्य प्रतिनिबन्धः) 1709
3. A Treatise Concerning the Principles of Understanding (अवगमनसिद्धान्तसम्बद्धः ग्रन्थः) 1710
4. passive obedience (निष्क्रिय आज्ञापालनम्) 1711
5. An Essay Towards preventing the Ruin of Great Britain 1721 (ग्रेट् ब्रिटेन-विनाश निवारणात्मकः निबन्धः )
6. Three Dialogues Between Hylas and Philoneus 1731 (हाइलास्-फिलोनियसयोः मध्ये त्रयः संवादाः )
7. Alciphron or the Minute Philosopher 1732(अल्सिफ्रोन् अथवा निमेषदार्शनिकः)
8. The Theory of Vision Viindicated and Explained 1733 (दृष्टिसिद्धान्तः विनिदर्शितः व्याख्यानं च )
9. The Analyst 1734 (विश्लेषकः)
10. A Defence of Free Thinking in Mathematics 1735 (गणितस्य स्वतन्त्रचिन्तन-रक्षणम् )

**ईश्वरसमर्थनम्-**

बर्कले मूलतः धार्मिकदार्शनिकोऽस्ति । ईश्वरस्य आत्मानश्च अस्तित्वं प्रमाणयितुं सः मानवस्य पुण्यं कर्तव्यमिति स्वीकरोति। तन्नये ईश्वरादीनामाध्यात्मिकविषयाणामाधारस्तदा सुदृढो स्यात् यदा भौतिकवादस्य खण्डनं संपूर्णतया न भूतम् । एतस्मात्कारणात् बर्कले भौतिकवादं नास्तिकवादं च सर्वथा नांगीकृतवान् । बर्कले ईसाइ-धर्मस्य पुरोहितः Father आसीत् । समाजे धार्मिकभावनानां उज्जागरणमेव स्वकीयं पवित्रं कर्म मन्यमानः सन् सर्वदा जनानां प्रवृत्तौ धार्मिकचिन्ताधारां सर्जयामास । तदानीं बर्कले-दर्शनस्य मौलिकसमस्या जीववादस्य ईश्वरवादस्य च स्थापनमस्ति।[8] ईश्वरवादस्य सिद्ध्यर्थं बर्कले आदर्शवादस्य समर्थनं करोति, अथवा ईश्वरवादस्तस्यादर्शवादानुसारं प्रभवति।

**विज्ञानवादमुपस्थापनम्-**

अवधारणावादो विज्ञानवादो वा वस्तुतः सत्यम् । बर्कले सिद्धान्तानुसारं प्रत्यक्षतो वयं भौतिकवस्तुनि न प्राप्नुमः, विज्ञानमेव प्राप्नुमः। तदेव ध्येयम् । अनेन आत्मेश्वर-जगदादीनि विज्ञानानि आध्यात्मिकविषयान् वर्णयन्ति । अक्षरशः यत् वयं पश्यामः स्पृशामो वा तन्न भौतिकं किन्तु विज्ञानरूपमिति भाव्यम् । विज्ञानात् परं किमपि न विद्यते ।[9]

विज्ञानानामस्तित्वं मनसि आत्मनि वा वर्तते। सुतरां वस्तूनामस्तित्वमपि आत्मनः सापेक्षं वा आत्मनिर्भरम् । आत्मा एव द्रष्टा । सः अनुभवी अस्ति। आत्मनः इयमनुभवशक्तिः परमात्मनो वा ईश्वरस्य वा दानमस्ति। आत्मा इन्द्रियाणामनुभावकः उच्यते । बर्कलेदर्शनज्ञातुं तत्पूर्ववर्तीनां केषाञ्चन दार्शनिकानां विचारमपेक्षते। अनुभववादस्य पराकाष्ठा संशयवादे अस्ति। बर्कले न अनुभववादस्य प्रवर्तको नापि तद्दर्शने अनुभववादस्यान्तः प्राप्यते। इत्यत्र बीजरूपानुभवस्य परिवर्धनं भूत्वा महाबोधिरूपेणाविर्बभूव। बर्कले अनुभववादस्य संशोधनं कृतवान्,परिमार्जितं कृतवान्। अनुभववादे या असङ्गतिः आसीत् सा सर्वा तैर्निरस्ता । स अनुभववादं पूर्णं कर्तुं प्रयत्नः कृतः । लक् महोदयस्य अनुभववादं बर्कलेमहोदयेन विज्ञानवादे परिवर्तितं कृतवान् ।

**अमूर्त्ततत्त्वविचारः-**

अमूर्तप्रत्ययस्य खण्डनं जार्ज बर्कले इत्यस्य दर्शने अतीव महत्त्वपूर्णं मन्यते । यतोहि अस्याधारेण सः स्वदर्शनं तर्कसंगतं कर्तुं समर्थोऽभवत् । उल्लेखनीयं यत्, बर्कले पूर्ववर्ति-दार्शनिको जॉन् लक् अमूर्तविचारं कृतवान् आसीत् । बर्कले मते अयं अमूर्तविचारो लोके दर्शने च बह्वी असङ्गतिं जनयति । 'मानवीय-ज्ञानसिद्धान्ताः' इत्यस्मिन् प्रसिद्धे ग्रन्थे तेन अस्मिन् विषये सम्यग्गालोचना विहिता। अस्य ग्रन्थस्य भूमिकायां बर्कले लक् मतं दृढतया सह खण्डनं कृतवान् । अयं अमूर्तविचारः कः ? बर्कले कस्मात्तस्य खण्डनं विदधाति ? इति विषयान् विस्तरेण चर्चाकर्तुं पूर्वं लॉक्-बर्कलेमतयोर्मध्ये यत् सादृश्यमसादृश्यं वा विद्यते तद्विषये अवलोकयामः । विरोधस्यापि केचन बिन्दवोऽत्र पश्यामः।

**अमूर्त प्रत्ययसमीक्षणम्**

(Abstracy idea)- लक् अनुभववादी आसीत् । तर्कवादस्य विरुद्धतां प्रदर्श्य अनुभववादं प्रस्तुय तेन ज्ञानसृष्टौ इन्द्रियाणां च भूमिका विचारिता । बर्कले तर्कवादस्यालोचकः अनुभववादस्य च कदाचित् समर्थकः आसीत। लक् नये यद् वयं किमपि जानीमः, तत्तु आत्म-संवेदन-रूपेण इन्द्रियाणां माध्यमेन जायते । एवं इन्द्रियानुभवोऽस्माकं ज्ञानस्य सीमा अस्ति। परन्तु इन्द्रियानुभवाधाररूपेण द्रव्यमस्तीति लक् मतस्य समर्थनं बर्कले न कृतवान् । वस्तुतोऽस्य बाह्यप्रकरणस्य खण्डनं बर्कले महोदयस्य मुख्यमुद्देश्यमासीत्। यथा वयं आरम्भे दृष्टवन्तः, भौतिकविचारयुक्तान् जनान् उद्धर्तुं तान् आस्तिकत्वेन प्रेरयितुं च बर्कले भौतिकद्रव्यस्य खण्डनं अत्यावश्यकं भाषितम् । यतो हि लक् अमूर्तविचाराणामाधाररूपेण अक्रियद्रव्यस्य अस्तित्वं स्वीकृतम्। बर्कले

अक्रियद्रव्यस्यास्वीकारात्तखण्डयितुं प्रवर्तते स्म ।

**बर्कलेद्वारा खण्डनम् -**

किमपि सामान्यं जातिर्वा अमूर्तप्रत्यय उच्यते। यथा मनुष्ये मनुष्यत्वम्। यतो हि राम-श्याम-काम-विमलादिनामानि जातिविचाराः प्रवर्तन्ते। केचन लोकाः कथयन्ति यत् मानवचिन्तने अमूर्तप्रत्ययचिन्तनस्य महत्त्वपूर्णा भूमिका अस्ति । तान् विहाय विकासो न भवितुमर्हति। अनेन माध्यमेन एव मानवस्य ज्ञानस्य विज्ञानस्य च वृद्धिः भवति । अमूर्तचिन्तनं केवलं पशुभ्यः मनुष्याणां श्रेष्ठतां स्थापयति। द्रव्याणामस्तित्वविषये जनाः कथयन्ति यत्, यद्यपि वयं अनुभवद्वारा इन्द्रिय-माध्यमेन यत् जानीमस्तत् केवलो गुणः एव, परन्तु तेषामनेकगुणानां समर्थनेन वयं द्रव्यसामान्यमेव कल्पयामः। एवं अमूर्तसंकल्पनास्वीकारो भवति। अमूर्ततायाः एषा क्रिया लोके तर्कशक्तिरिति उच्यते । अत्रेन्द्रियाणि केवलं विशेषान् प्रकाशयन्ति, परन्तु एतान् विशेषान् प्राप्य बुद्धिः सद्यः क्रियाशील: भवति, एतेषां आधारेण सामान्यं निश्चीयते । बर्कले उपर्युक्त-लॉक मतस्य दृढतया विरोधः कृतः। अस्य कृते बर्कले निम्नलिखितवादान् प्रददाति स्म।[10]

मानवबुद्धौ एतादृशी शक्तिः नास्ति। उदाहरणरूपेण बर्कले कथयति यदस्माकं बुद्धेः अमूर्ततायाः शक्तिः अस्ति चेद् भावयामस्तर्हि भ्रमः एव। या विशेषं गृहीत्वा सामान्यं करोतीति निश्चीयते । ते वदन्ति- श्अन्यजनेषु एषा शक्तिः अस्ति वा न, केवलं ते वक्तुं शक्नुवन्ति, मम कृते तु अहं निश्चयेन वक्तुं साहसं करोमि यत् मम कृते एतादृशी शक्तिर्नास्ति। श्वेत-कृष्ण-लम्ब-कुब्जादिप्रत्ययविचारेण वयममूर्तप्रत्ययसाध यितुं न शक्नुमः ।[11]

**१.ज्ञानशास्त्रीयतर्कः-**

बर्कलेमते जडद्रव्यं कदापि ज्ञानस्य विषयो भवितुं न पारयति, अतः ज्ञानेन तस्य अस्तित्वं विचारयितुं कदापि न शक्यते। जडद्रव्यज्ञानं न प्रत्यक्षेण नापि बुद्ध्या वा सम्भवति, प्रत्ययमात्रत्वात्।

**२.तार्किकतर्कः-**

लक् नये अस्माकं बुद्धौ वर्तमानाः षट् क्षमतासु एका क्षमता अस्ति या अमूर्तीकरणात्मिका Abstraction uchyate, यया सामान्यस्य Universal तथा द्रव्यस्य Substance प्रादुर्भावः स्वीक्रियते । बर्कले तन्न आद्रियते । तन्नये अमूर्तविचारस्य ध ारणा सर्वादौ भ्रमात्मका । बालभाषायां सामान्यप्रत्ययाः जातिवाचक-संज्ञारूपेण आगच्छन्ति, किन्तु तेषु अमूर्तीकरणक्षमता न विद्यते ।

**३. कार्य-कारणवादः-**

कार्य-कारणवादखण्डनार्थं बर्कले उक्तं यत् चेतनसंकल्पनाजननशक्तिः अक्रियद्रव्येषु न, अपितु आत्मेश्वरादिषु चेतनसत्त्वेषु एव विचारणीया। लक् महोदयस्य द्वितीयस्तर्को यत् प्रतीतिस्मृत्योर्मध्ये कोऽपि भेदः सिद्ध्यति। तत्र स्मृतिर्नाम आन्तरिकस्थितिः । प्रतीतिस्तु बाह्यभौतिकवस्तुप्रतीतिः। अनयोर्मध्ये तादात्म्यं नास्ति । नात्र कार्य-कारणभावः स्वीक्रियते।[12]

**जडद्रव्यखण्डनम्-**

बर्कले इत्यस्य मते अमूर्त-विचाराणाम् (जाति-विज्ञानानाम्) निषेधं विना वयं जडवस्तूनाम् अस्तित्वं निवारयितुं न शक्नुमः। यतः अमूर्तविचाराः अक्रिय-जडवस्तुनः स्वरूपाः सन्ति। अमूर्तविचारस्य अथवा काल्पनिकसामान्यस्य आधारेण जडवस्तुनो ज्ञानं प्राप्नुमः। वयं विविधमनुष्येषु मनुष्यत्वं कल्पयामः, नानाजातीयेषु गोषु गोत्वं विचिन्तयामः। यदि वयं सामान्यजातिं प्रत्ययं वा निराकुर्मस्तर्हि जडद्रव्यस्य निराकरणे सहायतां प्राप्स्यामः।

अत एव बर्कले कथयति यत् अस्माकं भौतिकवस्तूनाम् विश्वासस्य मूलकारणम् योऽमूर्तविचारः सः काल्पनिकः । साध ुषाप्रयोगाभावात्। अमूर्तविचारः भाषया: दूषितः प्रयोगः अस्ति[13] इति वर्कले आचार्या विवदन्ते।

**भाषाविश्लेषणम्-**

भाषायाः प्रकृतिः तस्याः दुरुपयोगः च-बर्कले प्रथमं भाषायास्तस्य दुरुपयोगस्य च दर्शने विचारः कृतोऽस्ति। यतो हि अधिकांशः दार्शनिकसमस्याः भाषायाः दुरुपयोगाद् हि उत्पद्यन्ते । अत एव बर्कले कथयति यत् प्रथमं भाषायाः सम्यक् प्रयोगो ज्ञातव्यः, येन अनुचितप्रयोग-परिहरितुं शक्नुमः। प्रथमं भाषा,तस्य व्यक्तीकरणप्रक्रिया, असाधुप्रयोगः,व्यवहारस्थानानि विषये सम्यग्ज्ञात्वा दर्शनक्षेत्रे तस्याः साधुप्रयोगः कर्तव्यः । अन्यथा भाषासमस्या बारम्बारं समायाति। अत्र वयं चिन्तयामः यत् बर्कले दार्शनिकविषयान् विहाय भाषाविज्ञानस्य विषये कस्मादुपदिशति?। समाधानमत्र बर्कले भाषाविज्ञानस्य व्याकरणस्य च प्रश्नं न उत्थापयति। किन्तु दार्शनिककठिनतायाः एकमात्रं कारणं भवति भाषासमस्या इति प्रमाणयति।

भाषायाः दुरुपयोगः एव विचारान् जटिलान् दोषपूर्णान् च करोति। इत्यत्र साधुप्रयोगज्ञानम् अत्यावश्यकम्। प्रायशो वयं दार्शनिकाः यदिवा अस्याः समस्यायाः समाधानं कुर्मः, तथापि न पूर्णतया । फलतः क्रमशः समस्याः वर्धमानाः भवन्ति । प्रत्येकस्य समाधानं प्राप्नुमः, नूतना समस्या काचिदुत्पद्यते। एवं समस्यानां संख्या सीमातीता भवति तथा च वयं किमपि अन्तिमं समाधानं कर्तुं न न शक्नुमः । यस्मात् परं समस्याः न उत्पद्यन्ते । प्रश्नोऽस्ति एताः समस्याः कथं समाप्ताः भवेयुः? किमर्थं वयं अन्तिमनिदानं न प्राप्नुमः ? बर्कले अस्य उत्तरं प्रददाति -यदि वयं अस्माकं समस्यायाः व्यर्थतां ज्ञातुं आगच्छामः तर्हि समस्यायाः समाप्तिः भविष्यति।[14]

**उपसंहारः-**

पाश्चात्यदर्शनेषु जर्ज बर्कले दर्शनस्य लोकप्रियता जनजनविदिता । समाजसेवा आसीदस्य महानुभावस्य चरमा पराकाष्ठा । ईश्वरवादप्रसंगो भवतु वा दरिद्रनारायणस्य सेवा, यत्र कुत्रापि तस्याविर्भावो बलवत्तरः तदानीन्तनःसमाजे । जनसेवा संपादयितुमनेन चिकित्सापद्धतिरपि कापि विलिखिता श्रूयते ।[15] सूक्ष्मदार्शनिक-विचारो बर्कलेदर्शने लालित्यपूर्णरूपेण प्रकाशितः । सर्वत्र अध्यात्म्यवादविचारप्रसंगे विचार्यमाणेऽस्य दर्शनस्य योगदानं महत्वपूर्णं वक्तुमिह शक्यते । अत्याधुनिक-मनोवैज्ञानिकाः केचन बर्कलेमतं समर्थयन्ति अन्ये नाद्रियन्ते । अत्यलं पल्लवितेन ।

**पादटिप्पण्यः**

1. मतिप्रशिक्षदर्शनशास्त्रम् पृ-९१
2. पाश्चात्यदर्शन पृ-१४७
3. George Berkeley, (born March 12, 1685, near Dysert Castle, near Thomastown?, County Kilkenny, Ireland—died January 14, 1753, Oxford, England), Anglo-Irish Anglican bishop, philosopher, and scientist best known for his empiricist and idealist philosophy, which holds that reality consists only of minds and their ideas; everything save the spiritual exists only insofar as it is perceived by the senses. https://www.britannica.com/biography/George-Berkeley
4. तत्र
5. https://hindiguider.com/george-berkeley-ki-jivani-aur-darshanik-vichar/
6. पाश्चात्य दर्शन का ऐतिहासिक सर्वेक्षणम्-डा: शोभा निगम पृ२७५
7. https://hindiguider.com/george-berkeley-ki-jivani-aur-darshanik-vichar/
8. https://hindiguider.com/george-berkeley-ki-jivani-aur-darshanik-vichar
9. तत्र
10. पाश्चात्य दर्शन का ऐतिहासिक सर्वेक्षणम्-डा: शोभा निगम पृ २७३
11. तत्र
12. दृष्टिः पृ ७९
13. https://hindiguider.com/george-berkeley-ki-jivani-aur-darshanik-vichar
14 पाश्चात्य दर्शन का ऐतिहासिक सर्वेक्षणम्-डा: शोभा निगम पृ२७३


**सहायकग्रन्थाः**

1-पाश्चात्य आधुनिक दर्शन की समीक्षात्मक व्याख्या-या मसीह मोतिलाल बनारसीदास दिल्ली १९८८
2-पाश्चात्य दर्शनर इतिहास-प्रो० हृदानन्द राय odisha state bureau of text book Bhubaneswar1975
3-परमतत्त्वमीमांसा- विद्याभूषण श्रीकृष्णजोशी चौखम्बा विद्याभवन वाराणसी १९६५ 4-पाश्चात्यदर्शन-चन्द्रधर शर्मा भार्गव बुक डिपो बनारस १९५४
5-पाश्चात्य दर्शन का इतिहास-संपादक प्रो० दयाकृष्ण राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर १९७९
6-पाश्चात्य दर्शन का इतिहास- फ्रेंक थिली सेण्ट्रल बुक डिपो इलाहावाद १९५४ 7-पाश्चात्य दर्शन - गुलाव राय लक्ष्मीनारायण प्रेस बनारस १९७९
8-हिन्दु दर्शन ओ खीष्टीय दर्शन, श्री परमानन्द दत्त आनन्द पालित रोड कलिकता १३३५ साल
9. पाश्चात्य दर्शनेर इतिहास, द्वितीयखण्ड श्रीतारक चन्द्र राय-गुरुदास चट्टोपाध्याय एण्ड सन्स-१९५२
10-प्राच्य ओ पाश्चात्य दर्शनेर इतिहास, प्रथमखण्ड, द्वितीयभाग-योगीन्द्रनाथ समाद्दार-१३७२ साल
11- प्राच्य ओ पाश्चात्य दर्शनेर इतिहास, प्रथमखण्ड, प्रथमभाग-योगीन्द्रनाथ समाद्दार-१३७२ साल
12.पाश्चात्य दर्शन का ऐतिहासिक सर्वेक्षणम्- डाः शोभा निगम २७३
13.https://hindiguider.com/george-berkeley-ki-jivani-aur-darshanik-vichar
14.पाश्चात्य दर्शन का ऐतिहासिक सर्वेक्षणम्- डाः शोभा निगम पृ-२७३


**संस्कृतगज्जलिका**

## 'गज्जलिका'



प्रणेता©
**प्रो. ताराशंकरशर्मा पाण्डेयः**

गजगामिनी लसति गज्जलिका ।
स्वरमाधुरी भवति गज्जलिका ।।1।।
वनिता मता मणिरिवोज्ज्वलिका।
जनमोदिनी जगति गज्जलिका।।2।।
सलिलार्धपूरभर-गर्गरिका।
सममेव सा ध्वनति गज्जलिका।।3।।
तनुते मनः कुसुमितं कविता ।
सुकवेर्यशो भजति गज्जलिका।।4।।
सुरभिं प्रसारयति वल्लरिका।
कवितातनुं सरति गज्जलिका।।5।।
करताल-सम्मिलित-झल्लरिका।
कविगीतितालमिव गज्जलिका।।6।।
प्रभुमन्दिरे रसति घर्घरिका ।
नवरास-गीतमिव गज्जलिका।।7।।
कविशंकरेण नव- तारकिता ।
रचिता यशो भजति गज्जलिका।।8।।
भ्रमरीव तारकितशंकरपाः।
फलतीव पद्ममधु गज्जलिका।।9।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट-पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर (डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'गज्जलिका'नाम गजलगीतिकाव्यं सम्पूर्णम्।

## लौकिकालौकिकम्



-डॉ. निरंजन मिश्र

सखे दृष्टं त्वया नूनं लौकिकं वा ह्यलौकिकम्।
लौकिकालौकिकं किंचित् दर्शयामि हिताय वः।।
लोके भवं वा लोकेन भवं लौकिकमुच्यते।
लौकिके+स्फुटरूपेण संस्थितं खल्वलौकिकम्।।
कर्मेन्द्रियैस्सुसंज्ञातं लौकिकं वक्तुमुत्सहे।
ज्ञानेन्द्रियैश्च संज्ञातं नूनमेवास्त्यलौकिकम्।।
लौकिके पार्थिवे देहे तिष्ठत्यात्मा ह्यलौकिकः।
शरीरे ह्यात्मनो वासः शरीरं चात्मयन्त्रितम्।।
लौकिकानन्दलाभेनालौकिकानन्दरोधनम्।
लब्धे त्वलौकिकानन्दे लौकिकस्यापि रक्षणम्।।
लौकिके+लौकिकं द्रष्टुं न सर्वे धृतशक्तयः।
शक्तैर्ह्यलौकिकं पूर्वं लौकिके विनिवेश्यते।।
कर्गजे लिखितो राजा नूनमेवास्ति लौकिकः।
किन्तु तस्मिन् हि राजत्वं नूनमेवास्त्यलौकिकम्।।
लौकिकावरणं भित्वा+लौकिकालोकलोकनम्।
लौकिकालौकिकेनात्र को+पि कर्तुमिहार्हति।।

नवा रचना आस्वाद्यताम्

## गम्भीरता

डॉ.राजकुमारमिश्रा

हासो मुखे नो लोक्यते चेष्टाऽपि नोत्तरदायिनी
लाभाय कस्मै साधिता बन्धो! त्वया गम्भीरता?।।१
हे काक! कोकिलसम्मुखे ज्ञायेत नो तेऽकण्ठता
लोकैश्छलेन यतस्त्वया बहुधाऽऽश्रिता गम्भीरता।।२
नैकाङ्गना भुक्तास्सुरां पीत्वाऽऽश्रमे रात्रौ त्वया
भक्तेषु किन्त्वादर्शिता प्रातर्महागम्भीरता।।३
चापल्यमस्ति तथापि भो विद्वत्सु गौरवहेतुना
कतिधाऽऽश्रिताऽस्ति मयाऽपि नो प्रच्छन्नतो गम्भीरता।।४
भृत्वान्तरे गर्वति न यो रत्नं सुधां च रसायनम्
रत्नाकरस्य हि तस्य सा गम्भीरता गम्भीरता।।५
निर्लज्जमाना मानवाः सर्वे समाना दानवाः
नो लोक्यतेऽद्य ततो यथार्था कुत्रचिद् गम्भीरता।।६
इच्छा किमपि वक्तुं सखे! हृदये तदानीं मेऽभवत्
मौनं स्थितोऽहं ते यतो ह्यासीत् मुखे गम्भीरता।।७

# गंगा-लहरी



रचयिता
**विशिष्टाचार्यः डॉ. सर्वेशकुमारमिश्रः**
**(काशीकुंज जमुनीपुर प्रयागराज)**

**('भाति मे भारतम्' इति ग्रंथस्य सर्जकेभ्यः स्वर्गीयेभ्यः आचार्यरमाकांतशुक्लवर्येभ्यः समर्पिता इयम् रचना गंगालहरी)**

अविरलगंगे! पावनगंगे!
मुक्तिप्रदे !हे निर्मलगंगे!
शुद्धिप्रदे! हे पूततरंगे!
संगमगंगे! काशीगंगे! ।।1।।

मातः! गंगे ! प्रातः गंगे!
पापं क्षालय हर हर गंगे!।
बुद्धिं शुद्धिम् कुरु कुरु गंगे!।
भवसागरतः तारय गंगे! 2।।

नित्यं विद्याम् देहि मे गंगे!
दुःखम् नाशय मे मृदुगंगे!।
भीष्मपितामहजननीगंगे!।
निजपदपद्मे पददे गंगे!।।3।।

केशवनखजे! शिवशिरशोभे!
भागीरथकुलतारकगंगे! ।
अवनीशानाम् पालकगंगे !
पापीपापविनाशकगंगे!।।4।।

गंगोत्रीतः उपजे! गंगे!
बंगप्रपाते पतिते! गंगे!
किल्विषक्लेशविदारिणि! गंगे!
तीर्थप्रयागे शोभितगंगे ।।5।।

गुरुगरिमाविस्तारकगंगे!
भारतगौरववर्द्धकगंगे!।
सर्वेशस्तुतिपूजितगंगे!
काशीकणकणपावकगंगे! ।।6।।

सीतारामसमर्चितगंगे!
निषादराजभवतारकगंगे!।
भूतप्रेतनिर्बाधकगंगे!
काशीकुंजनिवासे गंगे!!।।7।।

कलिमलहारकतारकगंगे!
वाणीयमुनाभूषितगंगे!
हनुमतत्प्रीतिविवर्द्धकगंगे!
पार्वतीपतित्रिभुवनसंगे!!।।8।।

वाणीयमुनागंगत्रिवेणी
तीर्थप्रयागे ह्यद्भुद्श्रेणी ।
वेणीमाधवसेवितगंगे!
हर! हर! गंगे! हर! हर! गंगे!।।9।।

अकबरदुर्गसुशोभितगंगे!
भरद्वाजऋषितारकगंगे!
दुर्वासामखभूषितगंगे!
दीनदुःखीधनदे हे गंगे! ।।10।।

कलिमलहारिणि! दुर्गमतारिणि!
घोराघोरनिवासदे गंगे!
सुरनरमुनिजनसेवितगंगे
शोकमोहनिस्तारदे! गंगे!।।11।।

पापविमोचनि मातः गंगे!
मृगमरीचिकानाशकगंगे!।
अवनिसुधासंवाहकगंगे!
आतपतापकनाशकगंगे!।।12।।

निर्बलदुर्बलबलदे! गंगे!
सरलविमलमतिदे! हे गंगे!।
अनाथनाथकर्तारकगंगे!
पुत्रकलत्रप्रदायकगंगे! ।।13।।

शैयादानसमर्चितगंगे!
धीवरमगरविलासितगंगे!।
शाटीपुष्पानंदितगंगे!
मांत्रिकतांत्रिकसेवितगंगे!।।14।।

वेदप्रतापप्रतापितगंगे!
हर हर गंगे हर हर गंगे!
सूर्यमरीचिविभूषितगंगे!
चंद्रचंद्रिकाराजितगंगे!।।15।

आदिगुरुसमुपासितगंगे!
नौकायानसुशोभितगंगे!
सागरगागरगामिनि गंगे!
पार्वतीशजटाश्रितगंगे!।।16।।

केशवराघवसेवितगंगे!
संतमहामुनिपोषकगंगे!।
देशविदेशसुचर्चितगंगे!
शस्यश्यामलाकरि हे गंगे!।।17।।

गिरिगह्वरसमलंकृतगंगे!
दीपज्योतिसुशोभितगंगे!।
कर्गदनौकाडगडगगंगे!
स्वच्छचंद्रिकाभूषितगंगे!।।18।।

अगरुधूपतः धूपितगंगे!।
शिविरनिवाससुवासितगंगे!
अगरवर्तिकाधूमितगंगे!
यज्ञहवनधूमायितगंगे! ।।19 ।।

गगनवितानविभूषितगंगे!
सुंदरसुघरतटीमृदुगंगे! ।
पीपापुलिनयुते मे गंगे!
हे पंचतत्वतः पंचितगंगे! ।।20।।

तव निर्मलनीरे मातः गंगे!
स्नात्वा ह्युक्त्वा हर हर गंगे!
मुक्तिम् सेवति हे ह्यानंदे!
भक्तिम् देहि सदा मे नन्दे !।।21।

जनजीवनजलदे हे गंगे!
जडे जीवनं कुरु कुरु गंगे!
शोकविमोके मातः गंगे!
स्थैर्यम् वित्तम् देहि मे गंगे!।। 22।

मृज्जीवानाम् तारकगंगे!
वह्निज्वलितशवशामकगंगे!।
मरणशौचसंशुद्धिदे गंगे!
तंत्रसाधनाफलदे गंगे! ।। 23।।

वसतु सदा शिव! मनसि हे गंगे!
वचसि सदा वस मातः! गंगे! ।
दिनं पुनीतं मे भव गंगे!
रात्रौ शांतिः भवतु मे गंगे! ।।24।।

रात्रौ प्रातः शिव! शिव! गंगे!
हर! हर! गंगे! हर! हर! गंगे!।
सुखदे! गंगे! धनदे! गंगे!
अर्थकामपुरुषार्थदे गंगे!।।25।।

गिरीशजटातः निःसृतगंगे!
पर्वतपादप्रवाहितगंगे!।
उत्तुंगशिखरतः पतिते गंगे!
मे मानसकुंडविहारिणि गंगे! 26।।

गजगजेंद्रविलोडितगंगे!
वानरयूथप्रसंशितगंगे!।
वायुवेगविवर्धितगंगे!
त्वं जलधिगामिनी मातःगंगे!।27।।

अंबरवर्षापुलकितगंगे!
नगाधिराजविभूषितगंगे!
देवदनुजसंपूजितगंगे!
नरकिन्नरदुःखहरदे गंगे!।।28।।

शश्वद्धारसमन्वितगंगे!
पावनधारोद्धारकगंगे!
धीरधैर्यसंभारकगंगे!
धराधामपरिपालकगंगे!।।29।।

गगनगिरीशसुदर्शितगंगे!
क्षितिक्षितीशसंपालकगंगे!
प्रपातांतविरूढितशष्पे गंगे!
अमलविमलमतिदे हे गंगे!।।30।।

जीवनजंजालसमुक्तकगंगे!
भवबाधाविध्वंसकगंगे!।
अंजनिसुतप्रदायके गंगे!
वानरराजराजिते गंगे!।।31।।

खगमृगवृंदशोभिते गंगे!
हे मगरासने भूषिते! गंगे!।
अंबार्पितधूपदीपनैवैद्ये !
हे लक्ष्मीकांतसुप्रिये गंगे!।।32।।

शिवशिखरे भूपालकगंगे!
हरहरनिनादकृते हे गंगे!।
सर्पासर्पकृते भो गंगे!
मामुद्धारय नितप्रति गंगे!।।33।।

जयतु जयतु हे मातः गंगे!
नित्यं मामुद्धारय गंगे! ।
संसारापारत तारय गंगे!
जयतु जयतु ह्युद्धारकगंगे!।। 34।।

भुक्तिमुक्तिदे मातः गंगे!
आयुर्विद्याधनदे गंगे!।
भूतपिशाचत रक्ष मे गंगे!
दंपतिप्रेमप्रदे हे गंगे!।।35।।

भूपतिहर्षहर्षिते गंगे!
दानीजनमनराजितगंगे!
अंधकनेत्रप्रदायिनि गंगे!
कुमतिसुमतिपरिवर्तिनि गंगे!।।36।

कुबुद्धिसुबुद्धिकृते हे गंगे!
दुर्मेधसुमेधकृते हे गंगे!
वाणीवैभवदायिनि गंगे!
हर्षय हर्षय मां हे गंगे! ।।37।।

सौम्ये शांतिम् स्थापय गंगे!
मयि रौद्ररसं न हि धारय गंगे!।
बुद्धिम् शुद्धिं कुरु कुरु गंगे!
बुद्धिम् मे विस्तारय गंगे!।।38।।

नमामि गंगे! नमामि गंगे!
भजामि गंगे!भजामि गंगे!।
जपामि गंगे! जपामि गंगे!
वदामि सत्यं हे मात गंगे!! ।।39।।

मृषा न वाचेऽहं देवि गंगे!
नमामि गंगे! भजामि! गंगे!।
अहमागतो ते शरणे शरण्ये!
अनाश्रितोऽहं हे देवि! गंगे!।।40।।

न तातो न माता न बंधोर्बलं मे
त्वमेव सर्वम् हे देवि! गंगे!।
गुरोर्न छाया गृहे न माया
वदामि सत्यं मृषा न गंगे !।।41।।

धर्मार्थकामदे! मोक्षदे गंगे!
निर्मलबुद्धिप्रकाशिनि गंगे!
जय जय गंगे! जय जय गंगे!
दुःखं हर त्वरताम् मे गंगे!!42।।

सजलनयनहं देवि हे गंगे!
निराधारहं पश्य हे गंगे!।
मोहं सर्वम् नाशय गंगे!
रक्षय रक्षय मां हे गंगे!।।43।।

निर्मलजलकलिनाशिनि गंगे!
तपोभूमिविस्तारदे गंगे!।
त्यागतपस्यावर्धिनि गंगे!
भोजनस्वादविवर्धिनि गंगे! 44

जनगणमननंदिते हे गंगे!
ब्रह्मतेजविस्तारदे गंगे!।
कायक्लेशनिर्मूलिनि गंगे!
मानसतापकनाशिनि गंगे!।।45।।

निजचरणे शरणं देहि मे गंगे!
सदा सदा मां पालय गंगे!।
जन्मनि जन्मनि देवि हे गंगे!
मां त्वं धारय ह्यंके गंगे!।।46।।

शारदासमारोपिते हे गंगे!
सूर्यसुतायमुना तव संगे!।
सम्मुखे पवनसुत मातः गंगे!
जय प्रयागे जय जय गंगे!।।47।।

आनय ह्यानय तीरे गंगे!
दुष्टान् मारय मारय गंगे!।
स्फारय स्फारय मातः गंगे!
दुराचारिजनहृदयं गंगे!।।48।।

इहेलिकायां मातः गंगे!
दुष्टान् घातय मारय गंगे!।
उत्कोचकानाम् सर्वम् गंगे!
त्वमुग्रे शीघ्रम् नाशय गंगे!।।49।।

शिक्षाजगति ये भ्रष्टाचारी
तेषाम् नाशं कुरु कुरु गंगे!
उत्कोचहारिजननाशं कृत्वा
शिक्षाम् विद्याम् रक्ष मे गंगे!।।50।।

त्वं जानासि सर्वम् हे देवि गंगे!
तदपि वदामि कथाप्रसंगे।
शिक्षाव्यवस्था शिथिला गंगे
ज्ञानाय कोऽपि पठति न गंगे।।51।।

संलक्ष्येह परीक्षाम् मातः गंगे!
पठति कश्चन गेहे हे गंगे!
विस्मार्य ततः तत् सर्वम् गंगे!
नेतापृष्ठे भ्रमति हे गंगे!।।52।।

स्वतंत्रभारते भ्रष्टाचारी
स्वेच्छाचारी भूतः गंगे! ।
भ्रष्टाचारः लोकाचारो
कुर्वन् तदपि न लज्जति गंगे!।।53।।

न हि मौनं धारय मातः गंगे!
तेभ्यो दण्डं देहि हे गंगे!
शीघ्रम् दंडं धारय गंगे!
ताडय ताडय मातः गंगे!!।।54।।

प्रतिभाविमर्दका ये गंगे!
दंडस्व तानपि मातः गंगे!
नय नय तानपि तीरे गंगे!
प्रज्वल प्रज्वल तानपि गंगे!।।55।।

धनमादाय प्रदाय हे गंगे!
पदे नियुक्तिः चलति हे गंगे!।
वित्तं नास्ति गृहे यस्य
इतस्ततः स भ्रमति हे गंगे!।।56।।

किम् बहुना हे मातः गंगे!
ज्ञात्वा सर्वम् मौनम् सर्वे।
ध्वन्युत्थानं तान् प्रति गंगे!
घंटिकाबंधनम् मातः गंगे! ।।57।।

मेघनीरविवर्द्धितगंगे!
मुनिमुनीशनिमज्जितगंगे!।
न्यायं कुरु हे मातः गंगे!
दंडय दंडय तान् हे गंगे!।।58।।

विज्ञाय समस्तं मौनं सर्वे
देशस्य भविष्यति किम् हे गंगे!
सर्वत्र स्वार्थपरता हे गंगे!।
एकाकी किं करोमि हे गंगे!।।59।।

देशे पशुस्वभावः व्याप्तः गंगे!
वित्तं सर्वम् नान्यत् गंगे!।।
किम् करणीयं वद वद गंगे!
मौनं न हि संधारय गंगे!।।60।।

मे शिरोवेदना बह्वी गंगे!
पीडाम् हर हे मातः गंगे!।
मनः शांतिम् देहि मे गंगे!
दुःखं हर हर मातः गंगे!।।61।।

श्रृणु गंगे! श्रृणु गंगे! मातः!
नमामि त्वाहं सायं प्रातः।
मयि भद्रम् कामय भद्रे! गंगे!
सायं प्रातः जननि! हे गंगे! ।।62।।

सज्जनतापकहारिणि गंगे!
दुर्जनसंतापप्रदायिनि गंगे!
काव्यशक्तिदे बलदे गंगे!
अजरामरवरदे हे गंगे!।। 63।।

अमोघज्ञानदे मातः गंगे!
पदप्रतिष्ठया साकम् गंगे!।
दुष्टसंगतिम् हर हर गंगे!
मे दोषसमूहं नाशय गंगे!।।64।।

जय देवि नमो वरदे हे गंगे!
जीव्यं देहि मे मातः गंगे!।
हे धर्महेतवे मातः गंगे!
धनं देहि मे सदा हे गंगे! ।।65।।

धनं विना सिद्धो न हि धर्मः
रक्षितधर्मः रक्षति गंगे!।
धनं प्रदाय धर्मम् मे कारय
जीव्यं तारय तारय गंगे!।।66।।

त्वया धर्मरति दत्ता गंगे
धनमन्यान्हे याचे गंगे!।
इदं शोभनं नास्ति हे गंगे!
देहि स्वयं मे धनदे गंगे!।।67।।

शुद्धाच्छुद्धं देहि हे गंगे!
करबलछलमुक्तधनं मे गंगे!।
शुद्धं वित्तं जीव्यं गंगे!
देहि सदा सर्वदा मे गंगे!।।68।।

तव तोयराशिवच्छुद्धधनं मे
विस्तारदे विस्तारय हे गंगे!
नमामि पादाम्बुजे ते गंगे!
शीघ्रम् कुरु कुरु मातः गंगे!।।69।।

त्वारताम् त्वारताम् मातः गंगे!
सायं प्रातः प्रतिक्षणम् गंगे!
अन्यथा काल पास्यति हे गंगे!
जीव्यानंदरसं मे गंगे!।।70।।

उदारसरलछविदे हे गंगे!
मतिमालिन्यविनाशिनि गंगे!
शंकरकिंकरकारिणि गंगे!
कलिकालुष्यविदारिणि गंगे!।।71।।

बंगभंगभूते सति गंगे!
तदपि अखंडा त्वमेव गंगे!।
अखण्डभावप्रतिपादकगंगे!
देशप्रदेशविदेशे गंगे! ।।72।।

देशविदेशे गंगागौरव
भारतमानविवर्द्धक गंगे!
देवभूमिऋषिकेशे गंगे!
सुरनरमुनिहर्षदे हे गंगे!।।73।।

तपोभूमिशीतलते गंगे!
गंगसरोवरपुण्ये गंगे!।
भारतभाग्यविधायिनि गंगे!
हे नमामि गंगे नमामि गंगे!।।74।।

तरुणतरंगे ह्यविरलधारे!
शीतलधारे पावनधारे।
जय जय गंगे! मातः गंगे!
भारतवासिनि भारतगंगे !।।75।।

वाणीसहचारिणि हे गंगे!
शांतनुजीवनसंगिनि गंगे!।
काशीपुराधीश्वरीगृहगंगे!
काशीशशिरसि शोभे हे गंगे!।।76।।

पापविदारिणि मातः! गंगे!
जगदोद्धारिणि श्रृणु श्रृणु गंगे!।
मानवता बहुपतिता गंगे!
मानव मूल्यच्युतो हे गंगे!।।77।।

वाग्धनी न हि भीष्मपितामह
कर्णसदृश न हि सखा हे गंगे!।
भीष्मप्रतिज्ञा न हि न हि गंगे!
नचिकेता संप्रति न हि गंगे! ।।78।।

सूर्यवंशमर्यादा गंगे!
संप्रति न हि श्रूयते हे गंगे!
निजजठरहुताशनशमनं गंगे!
श्रेयो सर्वजनाय हे गंगे!।।79।।

भिन्ना मतयो मुंडे भिन्ने
न हि न हि चिंते तान् प्रति गंगे!।
त्वमपि न चिंतय मातः गंगे!
संसारोयं ईदृश गंगे!
संसारोयं ईदृश गंगे!।।80।।

लोकभावनाभावितगंगे!
रमाकांतकराम्बुजपूजितगंगे!
रोरीगुलाबरंजिते हे गंगे!
रमारमापतिवंदितगंगे!।। 81।।

तरंगमालिके मातः गंगे!
हे भक्तवत्सले सौम्यतरंगे!।
शिवतांडवहर्षिते हे गंगे!
नमामि गंगे! नमामि गंगे!।।82।।

वैराग्यसिद्धिदे! हे शिवगंगे!
शीतलजलदे! जय गढगंगे!।
भवरोगत निस्तारदे गंगे!
नमामि गंगे! नमामि गंगे!।।83।।

नमामि गंगे! मातः गंगे!
नमामि गंगे! ज्योतितरंगे!।
जलवीचिस्वरूपे मातः गंगे!
नमामि गंगे! नमामि गंगे! ।।84।।

हे नमामि गंगे! नमामि गंगे!
हे नमामि गंगे! नमामि गंगे!।
हे नमामि गंगे! नमामि गंगे!
हे नमामि गंगे! नमामि गंगे!।।85।।

हे जपामि गंगे! जपामि गंगे!
हे जपामि गंगे! जपामि गंगे!।
हे जपामि गंगे! जपामि गंगे!
हे जपामि गंगे! जपामि गंगे!।।86।।

हे भजामि गंगे! भजामि गंगे!
हे भजामि गंगे! भजामि गंगे!।
हे भजामि गंगे ! भजामि गंगे!
हे भजामि गंगे !भजामि गंगे!।।87।।

हे रटामि गंगे! रटामि गंगे!
हे रटामि गंगे! रटामि गंगे!।
हे रटामि गंगे! रटामि गंगे!
हे रटामि गंगे! रटामि गंगे!।।88।।

स्वांतस्वरूपम् दर्शय गंगे!
निजमूर्तशरीरं दर्शय गंगे!।
जगद्रहस्यं दर्शय गंगे!
मामाकर्षय मातः गंगे!।।89।।

पितरजनं त्वं हर्षय गंगे!
संततिसमुदायं हर्षय गंगे!।
सन्मित्रसमूहं हर्षय गंगे!
कुटुंबसदस्यं हर्षय गंगे!।।90।।

श्वेतखगैः कलरविते गंगे!
काकसमूहनिनादितगंगे!।
केकीकुलकूजिते हे गंगे!
पिकनिनादसंभूषितगंगे!।।91।।

ईर्ष्या जनहृदये व्याप्ता गंगे!
जन द्वेषसमूहाच्छादित गंगे!।
निर्मलकेवलवस्त्रम् गंगे!
अमलमानसं कुरु कुरु गंगे!।।92।।

बोद्धारो मत्सरग्रस्ता गंगे!
राजपद्धतिः नष्टा गंगे!।
नेतारो स्मयदूषिता गंगे!
काव्यं कोऽपि श्रृणोति न गंगे!।।93।।

सुकृतसुकार्यम् श्रुत्वा गंगे!
न हि कोऽपि बाह्यतो हर्षति गंगे!
कुत्रापि परहितं वसति न गंगे!
एकाकी किं करोमि वद गंगे!।।94।।

निजनिजलाभं दृष्ट्वा गंगे!
लगति सर्वजन कार्ये गंगे!।
गुरुचरणे कापि न श्रद्धा गंगे!
एकाकी किं करोमि हे गंगे!।।95।।

भ्रातृमृते न हि विलपति भ्राता
पितृव्यमृते सति शोक न गंगे!।
मृतभगिनीगृहं इह कोपि न गच्छति
संसारोयं ईदृश गंगे!।।96।।

राजनीतिमग्नशिक्षका इह गंगे!
अध्यापनं न हि रोचते गंगे!।
मंत्रीपदमिच्छन्ति ते गंगे!
देशस्य भविष्यति किं हे गंगे!।।97।।

विहायाध्ययनं सर्वम् कार्य
नित्यं छात्रा कुर्वन्ति हे गंगे!।
वद पदप्रतिष्ठामानीमध्ये
निरभिमानी किं करोमि हे गंगे!।।98।।

किं जातं किमजातं गंगे!
किं वदामि हे मातः गंगे!।
सायं प्रातः मातः गंगे!
क्लेशं मनसि मे जातं गंगे! ।।99।।

मलजलशुद्धिप्रदे हे गंगे!
खलदलतारिणि मातः गंगे!।
स्वार्थमुक्तिदे मातः गंगे!
अक्षयवटसंभूषितगंगे! ।। 100।।

भस्मवाहिनी मातः गंगे!
जगत्तारिणीविमलतरंगे!।
पुष्पवाहिनी ह्युत्तुंगतरंगे
वित्तं शीघ्रम् देहि मे गंगे! ।।101।।

जटाजूटवासिनी हे गंगे!
रमसि जनानां हृदये गंगे!
चरैवेति संवाहकगंगे!
नित्यम् पालय मां हे गंगे ।। 102।।

सर्वसौख्यप्रदे हे गंगे !
प्रीतिलहरसंवाहिनि गंगे!।
गंगालहरी लिखिता गंगे!
अभिभूतोहं कृपया तव गंगे!।। 103।।

गंगालहरी मानसकुंडे
वहति सदा मे मातः गंगे!।
सायं प्रातः किमपि न गंगे!
गंगालहरी चलति मे गंगे!!।। 104।।

यो गंगालहरीपाठक भविता
तस्य पालिका गंगा भविता!।
सरक्षिका भव मातः गंगे!
कापि न्यूनता तस्य न संगे ।। 105।।

धनधान्यस्य सदा स्फीति हे गंगे!
गेहे तस्य भविष्यति गंगे!।
दुःखदारिद्रयं सर्वम् नष्टम् !
जयतु जयतु मे मातः गंगे! ।। 106।।

जयतु जयतु मे गंगालहरी
भो वरमेकं प्रदेहि मे गंगे!।
हे संगमगंगे काशीगंगे!
सान्निध्यं मे कुरु तव गंगे!।।107।।

---

## 1. नगर्याम्

(पुष्पिताग्रावृत्ते गझलगीतिः)



डॉ.हर्षदेवमाधवः

दितिसुतसदृशा वसन्ति दुष्टा खलचरिता ननु दुष्टवञ्चकाश्च ।
दिशि दिशि बहुरूपिणो भ्रमन्ति मनुजमिषेण हि प्राणिनो नगर्याम् ।।
विषयविषधरा विषाक्तकण्ठा फणरहिता हृदये निधाय मोहम् ।
मधुरवचनजिह्मदुष्टकार्याः सुजनगणैस्सह भोगिनो नगर्याम् ।।
कथमपि धनलाभप्राप्ति-सिद्धा बहुविधजालयुताः सदा प्रवीणाः।
सुजनवधकृतार्थता नु येषां दुरितयुता धनलोभिनो नगर्याम् ।।
उपवनरहितेषु चत्वरेषु परिभ्रमणे मिलनेऽथ लोकयाने।
सकलनियममुक्तकामकृष्टा रतिमधुपा अनुरागिणो नगर्याम् ।।
बहुविधवसनैस्तथा च दम्भैर्व्यसनपराश्च सुखाय कामलुब्धाः।
रचितनवनवाश्रमेषु सन्ति कपटयुताः खलयोगिनो नगर्याम् ।।
अधिकत्रमनिराशश्रान्तदेहाः प्रतिदिनमौषधसेवनेन दीनाः।
विपुलविभविनोऽपि त्यक्तकामा न हि सुखिनः खलु रोगिणो नगर्याम् ।।
(अयुजि नगरेकतो चकारो, युजि च न जौ जरगाश्च पुष्पिताग्रा)
(नन र य न ज जर ग)

## 2. चुम्बनम्

(छन्दोद्वये काफियाद्वयेन गजलप्रयोगः)
मनोजरम्यकिङ्करं / चुम्बनं ते भजाम्यहम् ।
दिने दिने गुणाकरं / चुम्बनं ते स्मराम्यहम् ।।
यत्र यत्र पुण्यका / तत्र तत्र महेश्वरः ।
स्नेहभक्तिशङ्करं / चुम्बनं ते नमाम्यहम् ।।
मनोजरम्यमन्दिरे/ श्रीगणेशायते शुभम् ।
रतीशदीपभास्करं/चुम्बनं कलयाम्यहम् ।।
मुखेन्दुमातृकामयं / मौनलिपौ त्वदोष्ठयोः ।
चित्तरञ्जकं परं / चुम्बनं मे लिखाम्यहम् ।।
अनन्यप्रेमपुष्पितं / हृत्पात्रेण विवर्धितम् ।
दिवानिशं मनोहरं / चुम्बनं धारयाम्यहम् ।।
प्रियाधरे समागमे / मधुरात्र्यां समर्पितम् ।
मुदाकरं सुखाकरं / चुम्बनं प्रणमाम्यहम् ।।
दिने दिने विवर्धते / दम्पत्योः प्रेमसञ्चयः ।
मनोभवस्य निर्झरं/चुम्बनं ते ददाम्यहम् ।।
अनङ्गतीर्थयात्रिकं/कृत्वौष्ठेषु प्रदक्षिणम् ।
सुखावहं परस्परं / चुम्बनं स्वीकरोम्यहम् ।।
विकम्पितैर्विभूषणैः/प्रारब्धे रतिविग्रहे ।
सकौतुकं पुरःसरं/चुम्बनं प्रेषयाम्यहम् ।।
अपूर्व-मद्यपानकं/निषेधाक्षरमण्डितम् ।
कृपाकरं सुधाकरं/चुम्बनं ते नयाम्यहम् ।
(प्रमाणिकानुष्टुप् छन्दसोः प्रयोगः)
(प्रमाणिका जरौ लगौ)

## 3. नास्ति (वसन्ततिलका)

शान्तिस्समस्तभुवने, सदने हि नास्ति।
रात्रिर्वाहिस्तु प्रसृता, शयने हि नास्ति।।
वक्त्रं विलोक्य मुकुरे करवाणि किं भोः।
रागस्य दिव्यसुषमा वदने हि नास्ति।।
नो साहसं हि मनसो भवनाच्च गन्तुम्।
श्रद्धा प्रयाणसमये चरणे हि नास्ति।।
भित्त्वा तमः प्रविशति प्रबलः प्रकाशः।
चन्द्रः प्रकाशरहिते गगने हि नास्ति।।
छन्दोक्षराणि गणितुं विफलः श्रमस्स्यात्।
यत्र ध्वनेर्मधुरता कवने हि नास्ति।।
गत्वापि किं नु करवाणि तदीयवीथीम्?
नाम्नो निजस्य स्मरणं वचने हि नास्ति।।
(उक्ता वसन्ततिलका तभजाजगौगः)
कामं कदम्बेषु वसन्ति सर्वे।

### 4. सर्वे (उपजातिः)

कामं कदम्बेषु वसन्ति सर्वे।
एकाकिनः किन्तु भवन्ति सर्वे ।।

# स्वीयस्वान्तानुभूतिः कविताकारणे रतिः

रचयिता - डॉ. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

वाञ्छा मे नास्ति भवितुं प्रसिद्धः
यन्मां जानीषे त्वं तदेव पर्याप्तः ।।१।।
दुष्टेन ज्ञातोऽहं दुष्टः शिष्टेन च सुशिष्टः
स्वाभिप्रायानुजातं मां जनाः पर्यचिन्वत ।।२।।
जीवनदर्शनमपि कियत् विचित्रम्
वर्षाणि प्रयान्ति सखे ! सायं न गतम् ।।३ ।।
एकविचित्रानुसन्धानमिदं जीवनम्
जेतुः पृष्ठतो बहु, अन्यथा बहुशः पृष्ठम् ।।४।।
यदुपविशाम्यहं प्रायशो मृत्तिकायाम्
मम वास्तविकता बहुशो विभाति माम् ।।५।।
विन्देऽहं समुद्रात् जीवनपद्धतिम्
प्रवहन् शान्ततया स्वानन्दे रजामि ।।६।।
तदुक्तं नो सत्यं यन्नास्ति मयि किमपि वैगुण्यम्
परन्तु सत्यमेतत् यन्मे नास्ति किमपि कौटिल्यम् ।।७।।
घटिकां क्रीत्वाऽहं किं बद्धवान् मे हस्ते
तदारभ्य किल कालः पतितो मे पृष्ठे ।।८।।
गृहं निर्माय स्थास्यामि सौख्ये वेति अचिन्तयम्
परन्तु सदनापेक्षा यात्रिणं कृतवान् हि माम् ।।९।।
विश्रामावकाशिकं गल्पं साम्प्रतं क्व हि बान्धव !
इदानीं नायाति सोऽपि शैशविकादिवासरः ।।१०।।
जीवनजीविकायाने कथम्मे रङ्गनिष्प्रभः
हसन्क्रीडन् जीवन् वाऽपि सामान्यं लगति इव ।।११।।
तदानीं प्रत्युषे काले हसन्तो जागृता वयम्
बहुवारं त्विदानीन्तु सायं यातं विना स्मितम् ।।१२।।
सम्बन्धं निर्वहन् भ्रातः ! कियद्दूरं गतो न्वहम्
हरन्तं स्वात्मिकं भूयः प्रापन् प्रियजनान् बहु ।।१३ ।।
आहुः जना हाम्यहं प्रायशो बहुशो सखे !
परं न्वहं स्वीयक्लेशं गोपायन् श्रान्ततां गतः ।।१४।।
हसन्मुखोऽस्मि सर्वेषां सुखदश्च भवाम्यहम्
ध्याये न स्वात्मिकं तावत् कुर्वेऽन्येषान्तु मङ्गलम् ।।१५।।
जानेऽहं नास्ति मे मूल्यं किञ्चिदिह धरातलात्
तथापि मूल्यवानस्मि साधुसज्जनसङ्गमात् ।।१६।।
(कतिपयहिन्दी पद्यानां छायानुशीलनेन रचितमिदं काव्यम्)




प्रतिक्षणं प्रज्वलति श्मशानम् ।
वह्नौ क्षणानां निवसन्ति सर्वे ।।
कथं वनं स्यान्मृतचेतनाभिः ।
छिन्दन्ति शाखाश्च रुदन्ति सर्वे ।।
सत्यस्य मार्गे न जना श्द्विजिह्वाः ।
सहस्रजिहूवा विचलन्ति सर्वे ।।
मा गच्छ लब्धुं वचनस्य सत्यम् ।
विषं स्वकण्ठस्य वमन्ति सर्वे ।।
शुभ मुहूर्त तु तं गृहात् ते ।
याता हि याता न मिलन्ति सर्वे ।।
ज्ञातं न मूल्यं निजजीवनस्य ।
भारं शरीरस्य वहन्ति सर्वे ।।

## विशालमहिलासम्मेलनेन अंताराष्ट्रिययोगदिवसस्य २०२३ शंखनादेन

# योगधर्मेण विश्वस्मिन् सनातन धर्मस्य प्रतिष्ठा वर्धिष्यते-स्वामी रामदेवः

नवदिल्ली। योग ऋषि स्वामी रामदेवस्य कुशल नेतृत्वे पतंजलि विश्वविद्यालयः, भारत स्वाभिमानम् अथ च जी-20 सहयोगि संगठनं डब्लू -20 इत्येषां संयुक्त तत्वाधाने आयोजित विशाल महिला सम्मेलनं इंदिरा गांधी स्टेडियम, नई दिल्ली इत्यत्र आयोजितम्। सम्मेलने देशस्य विभिन्न राज्येभ्यः प्रायः 5500 महिलाः प्रतिभागं कृतवत्यः। अवसरेस्मिन् योग ऋषिः स्वामी रामदेवः महिलानां शारीरिक मानसिक-आध्यात्मिक स्वास्थ्याय योगस्य प्रशिक्षणं दत्तम्। स्वामी रामदेवः अवदत् यत् 21 जून इति दिनांके अंताराष्ट्रिय योग दिवसः वैश्विक स्तरे समाचरितः। तेनोक्तं यत् अस्य आरंभः दिल्लीतः आरभ्य विश्वव्यापी भविष्यति। कार्यक्रमे पतंजलि योग समितेः प्रमुखा महिला केंद्रीय प्रभारिणी साध्वी आचार्या देवप्रिया कथितवती यत् महिलाः योग माध्यमेन समाजे राष्ट्रे च परिवर्तनम् आनेस्यन्ति। सम्मेलने भारतीय शिक्षा परिषदः कार्यकारी अध्यक्षः श्री एनपी सिंहः अवोचत् यत् समाजे अद्य महिला सशक्तिकरणस्य आवश्यकता नास्ति यतः जननी स्वगर्भे नवसु मासेषु शिशुं गर्भे संस्थाप्य असहनीय पीडया जीवनम् उत्पादयति अतः सा पूर्णतया सक्षमा। अवसरेस्मिन् स्वामी रामदेवः उपस्थिताय मातृशक्तये उपस्थिताय च जनसमूहाय भ्रमरी, ताड़ासनं, वृक्षासनं चेत्यादीनि अभ्यासपूर्वकं शिक्षितवान्। कुमारी व्याख्या शिव तांडव स्त्रोतं प्रत्याधारितं नृत्यं प्रस्तुतवती स कार्यक्रमं सफलीकर्तुं श्री एसके तिजारावाला, परमिंदर गुनिया, भ्राता डवासः, भ्रातामोतीलालः, भगिनी सविता, भगिनी संध्या इत्येषां विशेषसहयोगः आसीत् ।





# नैक्टर लैण्ड द्वारा छात्राभ्यः छात्रवृतिः दत्ता

रघुनाथ गर्ल्स पोस्ट ग्रेजुएट महाविद्यालयस्य (मेरठ) संस्कृत विभागेन प्राचार्या प्रो. निवेदिता कुमार्या च संरक्षणसंस्कृतसाहित्य परिषदश्च के तत्त्वावधाने 'नैक्टर लैण्ड द्वारा छात्राभ्यः छात्रवृतिः दत्ता। गीता एवं आनन्दः' शीर्षकं प्रति व्याख्यान-आयोजनं विहितम्। नैक्टर लैण्ड मधुभूमि संस्था संस्थापकः डॉ. वी. के. आर्यः संस्कृत विभागीये द्वे छात्रे तनुः एम. ए. द्वितीयवर्षीया दिव्या एम. ए. प्रथम वर्षीया इत्याभ्यां छात्रवृत्तिः प्रदत्ता। प्रतिवर्षं कार्यक्रमः अयं महाविद्यालयस्य पुरातनच्छात्रा एवं विभागाध्यक्षा डॉ. मधु आर्यायाः पुण्यस्मृतौ समाचर्यते।श्री वी. के. आर्य, श्री हेमन्त रॉयः व श्रीमती रेणुः गीताद्वारा आनन्द प्राप्तिमार्गं प्रशस्तीकृत्य छात्रान् लाभान्वितान् अकरोत् । विभागाध्यक्षया डॉ. पूनम लखनपालद्वारा सर्वेभ्यः धन्यवादः ज्ञापितः। डॉ.अंजू रस्तोगी छात्राभ्यः शुभकामनाः दत्तवती। डॉ.उपासना सिंहः संचालनमकरोत् ।शोधच्छात्रा निशी सहयोगं कृतवती। विभागीया छात्रा दिव्या,स्वीटी ,मनीषा,निधिः अंजलिः, अर्चना,अलका,तनुः, उर्वशी, मेघा त्यागी, अंशुः, निशा, रश्मिः, तनुः इत्येताः उपस्थिताः आसन्।





## संस्कृतशास्त्राध्ययनाय संस्कृतभाषा आवश्यकी-विनयश्रीवास्तवः

लखनऊ। उत्तर प्रदेश संस्कृत संस्थान लखनऊ द्वारा मेमासीय सरल संस्कृत संभाषण कक्षायाः शुभारंभः कृतः । कक्षा संचालने 20 प्रशिक्षकाणां द्वारा सम्पादितम् । सत्रोद्घाटनं प्रशिक्षवः वैदिक मंगला चरणेन अकुर्वन्। प्रशिक्षु दुर्गेशः सरस्वती वन्दनां एवं च संस्थान गीतिकां च प्रस्तुतवती । प्रशिक्षू मोनिका, नीलमः च संस्कृत गीतं प्रस्तुतवत्यौ । संतोषः, माधुरी , मीनाक्षी च संस्कृत कक्षा संबंधितम् अनुभवम् उक्तवन्तः ।





सत्रे संस्थाननिदेशकः विनय श्रीवास्तवः कथितवान् यद् भारतीय दर्शनं संस्कृत सभ्यता संवाहकम् अस्मत्सनासनशास्त्रम् । संस्कृत शास्त्राध्ययनाय संस्कृत भाषा अत्यन्तम् आवश्यकी । अतः मान्यः मुख्यमंत्री कक्षायै अस्यै विशेषेण आग्रही । निश्चितमेव संस्कृताध्यापनेन शास्त्र संरक्षण सम्भवम्। योजना सर्वेक्षिका चंद्रकलाशाक्या शिक्षार्थिनाम् अनुभवाधारेण कक्षाणां व्यवस्थीकरणं विधीयत इत्युक्तवती । अवसरेस्मिन् प्रशिक्षण प्रमुखः सुधिष्ठ कुमार मिश्रः कक्षा संचालनस्य निरंतरतामेव योजनायाः सार्थकतां कथितवान् । क्रमेस्मिन् प्रशासनिकाधिकारी दिनेश मिश्रः , जगदानन्द झा च कक्षाप्रबन्धने एवं च प्रशिक्षक प्रबन्धने च स्व विचारं प्रकट्यकुर्वन् । तत्पश्चात् समागत अतिथिभ्यः प्रशिक्षुभ्यः अभिनंदनं समन्वयकः धीरजमैठाणी कृतवान् । तेनोक्तं यत् ग्रीष्मे अवकाशे आधिक्येन संस्कृत अनुरागिणः जनाः संस्कृतमध्येतुं विशेष रुचिः दृश्यते। जूनमासे इयं संख्या वर्धिष्यते। प्रशिक्षण समन्वयकः दिव्यरंजनः समागतेभ्यः धन्यवादं ज्ञापयन् योजनायाः सांख्यिकी विवरणं प्रास्तौत् । सत्र संयोजिका राधाशर्मा (समन्वयक) कक्षाणाम् इतिवृत्तमः उपस्थापितवती । मुख्यतया इदं सत्रम् अप्रेलमाससम्पूर्ति मेमासीय कक्षाणां शुभारंभं चाभिलक्ष्य स्थापितम् । कक्षाहेतवे निःशुल्कं पंजीयनं विधातुं sanskritsambhashan.com इति सम्पृक्तिर्वर्तते। शांतिमंत्रेण सह सत्रं सम्पन्नम् । गूगल मीट इत्यत्र आयोजिते अस्मिन् कार्यक्रमे संस्थानस्य पदाधिकारिणः, समस्त प्रशिक्षकाः , आमंत्रित शिक्षार्थिनः, एवं च सामाजिक संस्कृताभिमानिनो जनाः समुपस्थिताः आसन्।

## आचार्यतुलसीदासपरौहा विशिष्ट-पुरस्कारेण सम्मानितः

(डॉ.दिनेश चौबे) उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य साहित्य-विशिष्टसंस्कृत विभागयोःविभागध्यक्षः आचार्य तुलसीदासपरौहामहोदयः उत्तरप्रदेशस्य राजधान्यां लक्ष्मणपुरनगरे



भातखण्डे संस्कृतिविश्वविद्यालयस्य कला मण्डपसभागारे रविवासरे समायोजिते २०२३अन्ताराष्ट्रियसनातनधर्म ज्योतिर्विज्ञानसम्मेलने विशिष्टातिथिरूपेण उपस्थितः आसीत् अस्मिन्नैव कार्यक्रमे उत्तरप्रदेशस्य माननीयः उपमुख्यमन्त्री श्रीमान् ब्रजेशपाठकमहोदयः मुख्यातिथिरूपेण उपस्थितः आसीत् ।कार्यक्रमे आचार्यपारौहा महोदयः 'लाइफटाइम अचीवमेंन्ट आवॉर्ड' इति पुरस्कारेण सम्मानितः जातः। कार्यक्रमस्य अयोजकः राष्ट्रियज्योतिषरुद्राक्ष अनुसंधानसंस्थानम् आसीत् । संयोजकः च् आचार्यपङ्कजत्रिवेदी आसीत्।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।